XIS

ROCKNE

...मंत्रेण

...जलि दद्यात् ओं य...पतरो

तौ यज्ञियानामपिमद्रे सौमनसेस्योम १ अनेन मन्त्रेण पूर्ववद् द्वितीयाञ्जलिं पित्रे दद्यात ओं आयन्तुनः पितरः सोम्या-सीग्नष्ष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदन्तो धिब्रु वन्तुतेवन्त्वस्म्मान् २ अनेन मन्त्रेण पूर्ववत् तृतीयाञ्जलिम्पित्रे दद्यात् ओं ऊर्ज्जंवहन्तीरमृतंघृतम्पयः कीलालं परिस्रुतम् स्वधास्थतर्पयतमेपितॄन् १ ओं अद्येहामुकगोत्राऽस्म त्पितामहोऽमुकशर्मारुद्रस्वरूपस्तृप्यतामिदंतिलोदकं तस्मै-स्वधाइति पितामहाय प्रथमाञ्जलिं दद्यात् ओंपितृभ्यःस्वधा यिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्नपितरोमीम दन्तपितरोतीतृपन्तपितरः पितरः शुन्धद्ध्वम् २ अनेनमंत्रेण पितामहाय पूर्ववद् द्वितीयाञ्जलिं दद्यात् ओं येचेहपितरो

येचनेहयांश्चविद्मया२ उचनप्रविद्मत्वंवेत्थयतितेजातवेदः
स्वधार्भियज्ञ ठं. सुकृतञ्जुषस्व ३ अनेन मंत्रेण पितामहाय
पूर्ववत्तृयाञ्जलि दद्यात् ओं मधुवाताऋतायतेमधुक्षरंति
सिन्धवः माध्वीर्नः सन्त्वाषधीः १ ओं अद्येहामुकगोत्रास्म
त्प्रपितामहोऽमुकशर्मादित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै
स्वधा इति प्रपितामहाय प्रथमाञ्जलिं दद्यात् ओं मधुनक्त
मुतोषसोमधुमत्पार्थिव ठं० रजः मधुद्यौरस्तुनः पिता २ अनेन
मंत्रेण प्रपितामहाय पूर्ववद् द्वितीयाञ्जलिं दद्यात् मधुमान्नो
वनस्पतिर्मधुमाँ अस्तु सूर्यः माध्वीर्गावो भवन्तुनः ॥ ३ ॥
अनेनमंत्रेणप्रपितामहाय पूर्ववत्तृतीयाञ्जलिं दद्यात् आमावा
जस्येतिमंत्रंप० ओं अद्येहामुकगोत्राऽस्मन्माताऽमुकदेवी
वसुस्वरुपा तृप्यतामिदं तिलोदकं तस्यै स्वधा० इति त्रिःओं

अद्येहामुकगोत्रास्मत्पितामही अमुकदेवी रुद्रस्वरुपा तृप्यता-
मिदं तिलोदकंतस्यै स्वधा० इति त्रिः ओं अद्येहामुकगोत्रा-
स्मत्प्रपितामही अमुकदेवी आदित्यस्वरुपा तृप्यतामिदं ति
लोदकं तस्यै स्वधा इति त्रिः ओं नमोवः पितरोरसायनमोव
पितरः शोषाय नमोवः पितरोजीवायनमोवः पितरः स्वधायै
नमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवः पितरः पित
रोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्मैतद्धः पितरो
वासः ओं अद्येहामुकगोत्रअस्मन्मातामहोऽमुकशर्मावसुस्वरू
पस्तृप्यतामिदं तिलोदकंतस्मैस्वधा०इतिप्रथमाञ्जलिमातामहा
य दद्यात्० ओं नमोवःइतिमन्त्रेण पूर्ववद् द्वितीयतृतीयाञ्जली
मातामहाय दद्यात्० ओं अद्येहामुकगोत्रोऽस्मत्प्रमातामहोऽमु
कशर्मा रुद्रस्वरूपस्तृप्यतामिदंतिलोदकं तस्मैं स्वधा इति प्रमा

तामहाय प्रथमद्वितीय तृतीयाञ्जलयो दद्यात्० ओं नमोव इति मंत्रेण ओं अद्येहामुकगोत्रोस्मत्वृद्धप्रमातामहोऽमुकशर्मा आदित्यस्वरुपस्तृप्यतामिदं तिलोदकंतस्मैस्वधा० इतिवृद्धप्र मातामहाय प्रथमद्वितीयतृतीयाञ्जलयो दद्यात्०नमोवइतिम० ओंअद्येहामुकगोत्राऽस्मन्मातामह्यमुक देवी वसुस्वरुपातृप्य तामिदं तिलोदकं तस्यै० इति त्रिः ओं अद्येहामुकगोत्रास्मत् प्रमातामह्यमुकदेवीरुद्रस्वरुपा तृप्यतामिदंतिलोदकंतस्यैस्वधा० इति त्रिः ओं अद्येहामुकगोत्राऽस्मत्वृद्धप्रमातामह्यमुकदेवी आदित्यस्वरुपा तृप्यतामिदं तिलोदकंतस्यैस्वधा० इति त्रिः ततः श्लोकानुसारेण ज्येष्ठकनिष्ठादीन्सपत्नीकांश्चतर्पयेत्० ताताम्बात्रितयं सपत्नजननी मातामहादित्रयं सस्त्रि स्त्रीतन- यादितातजननीस्वभ्रातरः सिस्त्रयः ॥ ताताम्बात्मभगिन्य

पत्यधवयुक् जायापिता सद्गुरुः शिष्यास्सः पितरो महालय-
विधौ तीर्थे तथा तर्पणे ॥ ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृ
मानवाः ८ तृप्यंतु पितरः सर्वे मातृमाहामहादयः ॥ पितृवंशे
मृता येचमातृवंशेतथैवच ॥ गुरुश्वशुरबंधूनां येचान्येबान्धवा
मृताः ॥ २ ॥ तेतृप्तिमखिला यान्तु ये चास्मत्तोयकांक्षिणः ॥
ये बान्धवा बान्धवावायेन्यजन्मनि बान्धवाः ॥ २ ते सर्वे
तृप्तिमायान्तुमद्दत्तेनाम्बुनाखिलाः ॥देवासुरास्तथा यक्षानागा
गन्धर्वराक्षसाः ॥ ४ ॥ पिशाचागुह्यकाः सिद्धाःकूष्माण्डोस्त-
रवः खगाः जलेचरभूमिशया वायवाहारश्च जन्तवः ॥ ५ ॥
ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुनाखिलाः ॥ नरकेषु सम-
स्तेषु यातनासु त्रयेस्थिताः तेषा माप्यायनायैतद्दीयते सलिलं-
मया ॥ ६ ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनां ॥

आब्रह्मभुवनाल्लोकानिदमस्तु तिलोदकम्। यत्रक्वचनसंस्थानां क्षुत्तृष्णोपहतात्मनां ॥ इदमर्घ्यमेवास्तु मयादत्तं तिलोदकम् ॥ ८ ॥ अथ वस्त्रनिष्पीडनम् येके चास्मत्कुले जाता अपुत्रा गोत्रिणोमृताः तेपिवन्तु मयादत्तं वस्त्रनिष्पीडनोदकम् ॥ ९ ॥ ततः सव्यं कृत्वा पूर्वाभिमुखा भूत्वा आचम्य ब्रह्मादीन्पूजयेत् ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्तोद्विसीमतःसुरुचोव्वेनआवः सबुध्न्या उपमाअस्यविष्ठाः सतश्च योनिमसतश्चव्विवः ॐ ब्रह्मणेनमः ॐ इदंविष्णुर्व्विचक्रमेत्रेधानिदधे पदम् समूढमस्यपा ठं सुरे स्वाहा विष्णवेनमः ॐ नमस्तेरुद्रमन्न्यवउतोतइषवे नमः बाहुभ्यामुततेनमः ॐहृदायनमः ॐभूर्भुवः स्वः तत्सवितुः वरेण्यंभर्गोदेवस्यधीमहि धियोयोनः प्रचोदयात् ॐसवित्रेनम ॐ मित्रस्य चर्षणी धृतोश्रोदेवस्यसानसि द्युम्नंचित्र श्रवस्त-

मम् ॐ मित्रायनमः ५ ॐ वरुणस्योत्तम्भनमसि व्वरुणस्य
स्कम्भसर्ज्जनीस्तन्थो व्वरुणस्यऋृतसदन्न्यसि व्वरुणस्यऋृत
सदनमसिवरुणस्यऋृतसदनमासीद० ६ ॐ वरुणायनमः ॐ
एहिसूर्य सहस्त्रांशो तेजोराशेजगत्पते अनुकम्पयमांभक्त्या
गृहाणार्घ्यंदिवाकर ॥ अनेन मंत्रेण सूर्यायार्घ्यं दद्यात् ओं
अदृश्यमस्य केतवोव्विरश्ययोजनां २ अनु भ्राजन्तो अग्न
योयथा उपयामगृहीतोसिसूर्यायत्वा व्भ्राजायैषतेयोनिः सूर्य
त्वोव्भ्राजायसूर्य्यभ्राजिष्ठव्भ्राजिष्ठस्त्वन्देवेष्वसिव्भ्राजिष्ठो हम्म
नुष्येभूषुयासम्ॐ हठं सः शुचिषद्वसुरन्तरिक्षसद्धोतावेदिषद
तिथिर्दुरोणसत्नृषद्वरसदृतसद्व्योमसदब्जागोजा ऋृतजा
अद्रिजा ऋृतम्बृहत् इतिमंत्राभ्यां सूर्यमुपस्थाय प्रदक्षिणीकृत्य
दिग्भ्यो दिग्देवेभ्यश्च प्रणमेत् ॐप्राच्यै दिशे नमः इन्द्राय

नमः ॐ अग्नेय्यैदिनेनमः ओं अग्नयेनमः ॐ दक्षिणस्यै
दिशे नमः ॐ यमायनमः ॐ नैर्ऋत्यैदिशे नमः ॐनिर्ऋ
तये नमः ओं प्रतीच्यैदिशेनमः ओं वरुणायनमः ओं वाय
व्यैदिशेनमः वायवेनमः ओं उदीच्यैदिशेनमः ओं कुबेराय
नमः ओं ऐशान्यैदिशेनमः ओं ईशानायनमः ओं ऊर्ध्वायैदि
शेनमः ओं ब्रह्मणेनमः ओं अधोदिशेनमः ओं अनन्ताय
नमः ततउपविश्यनमेत् ओं ब्रह्मणे नमः ओं अग्नये नमः
ओं पृथिव्यै नमः ओ षधिभ्यो नमः ओं वाचे नमः ओं वाच
स्पतयेनमः ओं विष्णवेनमः ओं महद्भू यो नमः अद्भू योनमःओं
अपांपतयेनमःओं वरुणाय नमः संव्वर्च्चसपायसासन्तनूभिरग
न्महिमनसास ठं शिवेनत्वष्टासुदत्रोव्विदधातुरायोनुमार्ष्टत
न्वोयद्विलिष्ठङ्म् इतिमन्त्रेण मुखमभिमृश्य ओं तच्चक्षुर्देव ६

हितम्पुरस्ताच्छुक्रमुच्चरत् पश्येमशरदःशतंजीवेमशरदः शत
ठं शृणुयामशरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम
शरदः शतंभूयश्च शरदः शतात् इतिमन्त्रेणानामिकांगुष्ठाभ्यां
जलं स्पृष्ट्वा चक्षुः स्पर्शः कार्यः देवागातुविदोगातुं वित्वागा
तुमित मनसस्पत इमन्देवयज्ञठं स्वाहावातेधाःइति मन्त्रेण
पितॄन्विसर्जयेत् इति संक्षिप्ततर्पणम् ॥

श्रीगणेशायनमः ॥ अथैकोद्दिष्टश्राद्धविधिर्लिख्यते ॥
श्राद्धकालः पूर्वाह्णे मातृकं श्राद्धमपराह्णेतु पैतृकम् ॥ एको
द्दिष्टन्तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥ एकंपवित्रं एकोर्घ
एकपिण्डो नावाहनाग्नौकरणे नात्रविश्वेदेवाः तद्यथा एको
द्दिष्टं दैवहीनमेकार्घैकपवित्रकम् ॥ आवाहनाग्नौकरणरहितं
ह्यपसव्यंयतइतिस्मृतिवचनम् ॥ अथ प्रयोगः आचम्य गोम

योपलिप्तप्राङ्गणे दीपं प्रज्वाल्याऽपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्वा दक्षिणाभिमुखो भूत्वाऽदङ्मुखस्य पितृब्राह्मणस्य वामजानु स्ववामहस्तेन स्पृष्ट्वास्ववामजानु च पातयित्वा निमन्त्रयेत् ओं अद्येत्यादि अमुकगोत्रस्याऽस्मत्पितुरमुकशर्मणो वसुस्वरूपस्याऽद्यकर्तव्यसांवत्सरिकैकोद्दिष्टश्राद्धेः अनेन ताम्बूलगन्धपुष्पाऽक्षतेन तं मया निमन्त्रितः ओं निमन्त्रितोऽस्मि इति प्रतिवचनम् ओं अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः भवितव्यं भवद्भिश्चमया च श्रद्धाकारिणा सर्वायासविनिर्मुक्तैः कामक्रोधविजितैः भवितव्यं भवद्भिर्नोऽद्यतने श्रद्धाकर्मणि भवितव्यमितिप्रतिवचनम् ततो ब्राह्मणचरणौ प्रक्षालयेदनेन मन्त्रेण ओं नमोस्त्वनन्तायसहस्रमूर्तये-सहस्रपादाक्षिशिरोरुबाहवे सहस्रनाम्नेपुरुषाय शाश्वते

सहस्रकोटीयुगधारिणे नमः यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ॥ ततो मोटकादिकमादाय ओं अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरुपाद्यकर्तव्यसांवत्सरिकैकोद्दिष्टश्राद्धे एष पादार्घस्ते स्वधा ततःसव्येनाऽऽचम्य गृहंप्रवेशयेत् अपसव्येनओं आगता यूयं ओं सुस्वागतावयं । इदमासनमास्यतोम् ओं आस्य इति प्रतिवचनम् । ब्राह्मणमुदङ्मुखमुपवेशयेत् ओं कर्मपात्रमहङ्करिष्ये । कुरुष्वेत्यनुज्ञातः सन् । यद्देवादेवहेडनमितिकण्डिकात्रयेण पवित्रं गंधादिकञ्च स्वस्वमन्त्रैः क्षिप्त्वा कर्मपात्रं कर्तव्यं तत्रमंत्राः यद्देवादेवहेडनन्देवासश्चकृमाव्वयं अग्निर्म्मातस्मा देनसोविश्वान्न्मुञ्चत्व ठं हसःयदि दिवा यहिनक्तमेना ठं सि चकृमाव्वयम् व्वायुर्म्मातस्मादेनसोविश्वान्न्मु

ञ्चत्व ठं. सहः २ यदिजाग्रद्यदिस्वप्नएना ठं. सिंचकृमाव्वयम्
सूर्य्योमातस्म्मादेनसोव्विश्वान्मुञ्चत्व ठं. हसः पवित्रेस्थो
व्वैष्णव्व्यौसवितुर्व्वःप्प्रसव उत्पुनाम्म्यछिद्रेणपवित्रेणासूर्यस्यर
श्म्मिभिः । इतिमंत्रेणपवित्रं क्षिपेत् ओं शन्नो देवीरभिष्टय
आपोभवन्तुपीतये शंय्योरभिस्रवन्तुनः इतिमंत्रेण जलम्
तिलोसिसोमदैवत्यो गोसवोदेवनिर्मितः प्रत्नमद्भिः पृक्तः स्व
धयापितृल्लोकान्पृणाहिनः स्वाहा इतितिलान् श्रीश्च्चते
लक्ष्मीश्च्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्व्या-
त्तम्इष्ष्णन्निषाणामुम्मइषाणसर्बलोकम्मइषाणइतिपुष्पाणि ओं
गंधद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम् ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियम् इति गंधम् अक्षन्नमीमदन्तह्यवप्या
ऽअधूषत अस्तोषत स्वभानवोव्विप्रानविष्टयामतीयोजान्निव

न्द्रतेहरी इति अक्षतान् ततः सव्येन कुशत्रयसहितं कर्म
पात्रोदकमादाय ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतो
पि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॐ
पुण्डरीकाक्षः पुनात्वित्युक्त्वा श्राद्धदेशं द्रव्याणि आत्मानं
च सिञ्चेत् ॥ कुशादिकमादाय अद्येत्यादि अमुकगोत्रस्यो
ऽस्मत्पितुरमुकशर्मणः वसुरूपस्याद्य कर्त्तव्य सांवत्सरिकैको
द्दिष्टश्राद्धमेभिर्द्रव्यैरहं करिष्ये इति संकल्प्य ॥ ओं देव
ताभ्यः पितृभ्यश्च महायोगिभ्य एवच ॥ नमः स्वाहायै स्व
धायै नित्यमेव नमोनमःइतित्रिः पठित्वा ॥ सप्तव्याधादशा
रण्ये मृगाः कालञ्जरे गिरौ चक्रवाकाः सरद्वीपे हंसाःसरसि
२ मानसे ॥ तेपि जाताःकुरुक्षेत्रे ब्राह्मणा वेदपारगाः ॥ प्रस्थि
ता दीर्घमध्वानं यूयंकिमवसीदथ ॥ २ ॥ ये विप्रमुख्याः

कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च ।कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ॥ ३ ॥ पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः यत्रयत्रस्मरेद्विद्वान् पितृणां दत्तमक्षयम् ॥ ४ ॥ श्राद्धभूमौ गयां ध्यात्वा तथादेवं गदाधरम् उभाभ्यां च नमस्कृत्य ततः श्राद्धंसमारभेत् ॥ ५ ॥ गयागया गयादित्यो गायत्रीच गदाधरः गया गयासुरश्चैव षड्गयासु क्तिदायकाः ॥ ६ ॥ ईशानविष्णुकमलासनकार्तिकेयवह्नित्रया र्करजनीशगणेश्वराणाम् ॥ क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां पादान्नमामि सततं पितृ मुक्तिहेतोः ॥ ७ ॥ ॐ गयायै नमः ॐ गदाधरायनमः इति पठित्वा अपसव्येन दिग्बन्धनं कुर्यात् तिलसहितमोटकमादाय तिन्लान्पूर्वादिक्रमेणवक्ष्यमाण मंत्रैर्विकिरेत् ओं अग्निष्वात्ताः पितृगणा प्राचींरक्षन्तु मे

दिशम् अपहता असुरा रक्षा ठं० सिव्वेदिषदःॐतथा बर्हिषदः
पांतु याम्यां ये पितरः स्थिताः अपहता असुरा रक्षा ठं० सि
व्वेदिषदः ॐ प्रतीचीमाज्यपास्तद्वत् अपहता असुरा रक्षा
ठं० सिव्वेदिषदः उदीचीमपि सोमपाः अपहता असुरारक्षा ठं०
सिव्वेदिषदः ॐ उर्ध्वंतस्त्वर्यमा रक्षेत् कव्यवाडनलोप्यधः
ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः सर्वतश्चाधिपस्तेषां
यमो रक्षां करोतु मे ॥ मोटकं नीव्यां धारयेदनेन मंत्रेण ॐ
निहन्मि सर्वं यदमेध्यद्वेद्धताश्चसर्वेऽसुरदानवा मया ॥ रक्षां
सियक्षाः सपिशाचगुह्यका हता मया यातुधानश्च सर्वे इतिनी
वीबन्धनम् तिलसहितकुशखण्डत्रयं गृहीत्वा । प्रयान्तु दूरतः
सर्वे दैतेया दानवास्तथा सर्वांवघ्नोपशान्त्यर्थं क्षिपामि च
कुशांस्तिलान् ॥ इति मंत्रेण दक्षिणस्यां क्षिपेत् ततः सव्येन

विष्णुस्मरणम् ओं नमोनमस्ते गोविन्द पुराणपुरुषोत्तम इदं श्राद्धंहृषीकेश रक्षांसर्वतो दिशः ॥ अथासनम् ॥ अपसव्येन मोटकमादायॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः वसु स्वरूपस्याद्य कर्त्तव्य सांवत्सरिकैकोद्दिष्टश्राद्धे इदम्मोटकरूपमासनन्ते स्वधेति ब्राह्मणाय मोटकरूपमासनं दद्यात् ओं हस्तार्घपात्रमहं करिष्ये कुरुष्वेत्यनुज्ञातः सन् पुटकमेकमग्रे कृत्वा तत्र ओं पवित्रेस्थ इति मंत्रेण पूर्वाग्रं पवित्रं धारयेत् ॐ शन्नोदेवीइतिमंत्रेणजलं क्षिपेत् ओं तिलोसिसोमदैवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄल्लोकान् प्रीणाहिनः स्वधा इतिमंत्रेण तिलान् क्षिपेत् ओं श्रीश्चते इति पुष्पम् ओं गंधद्वारमिति गंधं ओं हस्तार्घपात्रं संपन्नमिति ब्राह्मणं पृच्छेत् ओं सुसंपन्नमिति तेनोक्ते ओं हस्तार्घपात्र

मुत्थापयामि उत्थापयस्वेत्यनुज्ञातो हस्तार्घपात्रं वामहस्तेकृत्वा
ओं नमो नारायणायेतिमंत्रेण पुष्पसहितं पवित्रं दक्षिणाग्रं
विप्रकरे धृत्वा वामहस्तस्थहस्तार्घपात्रं दक्षिणकरेणापिधाय
ओं या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उतपार्थवी
र्याः हिरण्यवर्णा यज्ञियास्तान आपः शिवाः शर्ठ० स्योनाः
सुहवा भवन्तु इतिमंत्रेणार्घपात्रस्थजलमभिमंत्र्य जलतिलमोट
कमादाय ओं अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपा
द्यसांवत्सरिकैकोद्दिष्टश्राद्धे एष हस्तार्घस्ते स्वधेति ब्राह्मणकरे
अर्घदद्यात् अर्घे पुनः प्रत्यर्घस्तु तदर्घपात्रं भूमौ धृत्वा सव्यं
कृत्वा तत्रस्थजलेन ओं तच्चक्षुरितिमंत्रेण चक्षुः स्पर्शः कर्तव्यः
ततोपसव्येनार्घपात्रं गृहीत्वा ब्राह्मणस्य वामपार्श्वे पित्रे
स्थानमसीतिन्युब्जं कुर्यात् तदुपरि कुशत्रयं दद्यात् ततः ओं

अर्चयिष्ये इति ब्राह्मणं पृच्छेत् अर्चयेत्युक्ते जलचन्दनपुष्पाक्षततास्बूलयज्ञोपवीतवस्त्रद्रव्यादिभिः समभ्यर्च्य धूपदीपौ चकारयेत् मोटकादिकमादायॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे एतान्यर्चनानि अत्र गन्धपुष्पाक्षतताम्बूलयज्ञोपवीतधूपदीपद्रव्यवासांसि ते स्वधा ओंअर्चनविधे सर्वं परिपूर्णमस्तुइतिविप्रकरे जलं दद्यात् ओं. अस्त्विति प्रतिवचनम् ततः सव्यपाचम्य अपसव्येन ओं यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति एवं मंडलमस्मै तत्सर्वभूतानिरक्षतु इति मंत्रेण वामावर्तेन चतुष्कोणमंडलं विधाय तिलघृतमधुजलयुतमन्नं मोटकादिसहितमादाय दक्षिणाभिमुखो भूत्वा ॐ इदमन्नं सजलमेतद्भूस्वामिपितृभ्योनमः इत्युत्सृजेत् अथान्नसंकल्पः । सोपस्करजलयुतमन्नमुपनीय

मधुनाभिघार्य अधोमुखाभ्यांव्यस्ताभ्यांपाणिभ्यामन्नपात्रमा-
लभ्य ॐ पृथिवी तेपात्रंद्यौरपिधानं ब्राह्मस्यमुखेअमृते
अमृतंजुहोमिस्वाहाइत्यालभ्यॐइदंविष्णुरित्यादिसुरेत्यन्तम्
ॐविष्णो कव्यमिदंरक्षमदीयं इति चपठित्वांविप्रदक्षिणांगुष्ठं
गृहीत्वाॐइदमन्नमित्यन्ने ॐइमा आप इति जले ओं इद-
माज्यमितिघृते ओंइदं हविरिति पुनरन्ने एतान्युपकरणानीति
क्रमेणान्नजलघृतादिषु विप्रदक्षिणांगुष्ठं निवेश्य ओं अपहता
असुरा रक्षा ꣳ० सिव्वेदिषदः इतिपठित्वा वामावर्तेन श्राद्ध
देशे तिलान् विकीर्य मोटकादीन्यादाय वामहस्तांगुष्ठांगु-
लिभिः क्रमेणान्नमपश्च स्पृष्ट्वा ओं अद्यामुकगोत्राया-
ऽस्मत्पित्रे अमुकशर्मणे वसुस्वरूपायाद्य सांवत्सरिकैको-
द्दिष्टश्राद्धे इदमन्नं सजलं सोपस्करं अक्षय्यतृप्तिहतास्ते

स्वधेति भूमावेव मोटकादिकमुत्सृजेत् ओं अन्नसंकल्पसि-
द्धिरस्तु इति विप्रकरे जलं दत्वा भवान् प्राशयतु इत्य-
पोशानन्दद्यात्॥तत श्राद्धकर्ताकुशोपरि विशन्सव्येन सव्या- श्रा.
हृतिकांगायत्रीं जपित्वा मधुवाता ऋतायते इति तृचंपठेत्
ओं मधु ३ ओं अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् तत्
सर्वमच्छिद्रमस्तु श्रीभास्करप्रसादतः ओं नमस्तुभ्यं विरूपाक्ष
नमस्तेनेकचक्षुषेनमः पिनाकहस्ताय वज्रहस्ताय वैनमः इति-
पठित्वा यथासुखं जुषस्वेतिवचनानन्तरं २ पितृसूक्तं च पठेत्
ओं अग्नये कव्यवाहनाय षट् ६ ओं तदेव १६ ओं कृष्णुष्व-
पाज इति पञ्च ५ ओं सुगावन्तमित्यादिअपांफेनेनेत्यन्तं ३६
ओं सहस्रशीर्षेति १६ ओं नमस्तेइति ६६ (१४८) ततोन्न
पात्रसन्निधौ गत्वास्तृतदक्षिणाग्रकुशत्रयायां भौ विकिरासनं १२

अपसव्येन मोटकादिकमादाय असंस्कृतप्रमीतानां त्यागिनां
कुलयोषिताम् उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् इति
मोटकरूपमासनमास्तृतकुशोपरि उत्सृजेत् समधुतिलघृतयुतम-
न्नमादायजलेनाप्लाव्य मोटकादिकं चादाय अग्निदग्धाश्चये
जीवायेप्यदग्धाःकुलेमम भूमौदत्तेन तृप्यन्तु तृप्तायांतुपरांगतिम्
इतिमंत्रेणास्तृतकुशोपरि तदन्नं विकिरेत् अत्रोङ्काररहितःकार्यः
ततः कुशान् परित्यज्यसव्येन हस्तौ पादौ प्रक्षाल्य द्विराचम्य
हरिं स्मरेत्ततो ब्राह्मणंतृप्तं ज्ञात्वा अपसव्येन जलगंडूषमिदन्ते
इति ब्राह्मणाय प्रत्यपोशानं दद्यात् अत्र वाग्विसर्गः सर्वेषांस-
व्येन सप्रणवव्याहृतिपूर्वा गायत्रीं जपित्वा ओं मधुव्वातेति-
ऋचं ॐ मधु ३ इति जपेत् ततोपसव्येनैवाञ्जलिं बध्वा
ब्राह्मण पृच्छेत् ॐ स्वदितम् ॐ सुस्वदितमिति प्रतिवचनम्

शेषमन्नं किं क्रियताम् । इष्टैः सह भुज्यतामिति प्रतिवचनम् ॐ पिण्डदानमहं करिष्ये इति द्विजं पृच्छेत् ओं कुरुष्वेति प्रतिवचनम् ततः पिण्डदानार्थं हस्तमितां चतुरंगुलोच्छ्रितां सैकतादिकां दक्षिणप्लवाम्पिण्डिकां निर्माय तदुपरि ओं ये रूपाणीति मंत्रेणांगारं भ्रामयित्वा दक्षिणस्यां क्षिपेत् ओं ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधयाचरन्ति परापुरोनिपुरो जेमरंत्यग्निष्ठां ल्लोकान्प्रणुदात्यस्मात्ततःपिण्डिका मध्ये वामेन पाणिना दर्भपिंजुलीं गृहीत्वा दक्षिणहस्ते कृत्वा सव्योपगृह्योपदक्षिणपाणिना ओं अपहता असुरारक्षा ठं० सिव्वेनिषद इति मंत्रेण दक्षिणाग्रां रेखां कृत्वा दर्भपिंजुलीमुत्तरस्यां क्षिपेत् ॥ ततो जलेन शन्नोदेवीरितिमंत्रेण पिण्डिकासेचनं तदनुछिन्नमूलकुशान्दक्षिणाग्रापिण्डिकायां दद्यात्

ततःसव्येनओं देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच ॥ नमः स्वाहायै स्वधायैनित्यमेवनमो नमः ॥ इतित्रिः पठेत् अपसव्यं विधाय एकं पुटकं वामहस्ते कृत्वा मोटकादिकमादाय अद्या मुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्यसांवत्सरिकैकोद्दि-ष्टश्राद्धे पिंण्डस्थानेऽत्रावनेनिदद्म तेस्वधेति अवनेजनन्दद्यात् मोटकादीनि पिण्डञ्चादाय वामहस्ते पुटकादिस्थजलमादाय ओं अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्य सांवत्स-रिकौकेद्दिष्टश्राद्धे एषपिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्तेस्वधे ति अवनेजनोपरि पिण्डंदद्यात् अत्रलेपभागनिषेधःकारंमोद्य कुशान्परित्यज्य सव्येन द्विराचम्य हरिंस्मरेत्ततःसव्येनैवगन्ध पुष्पादीन्यादाय पितरमुद्दिश्य ओं अत्रपितरोमादयध्वं यथाभा गमावृषायध्वमितिमंत्रंपठित्वादक्षिणावर्तं नोत्तराभिमुखोभूत्वा

श्वासं नियम्यभास्करमूर्तिपितरं ध्यायन् अपसव्यं कृत्वादक्षि
णावर्तेन दक्षिणाभिमुखा भूत्वा ओं अमीमदन्तपितरोयथा-
भागमावृषायिषत इति मंत्रेण गंधपुष्पादीनि पिण्डोपरिक्षिपेत्
ततोऽवनेजनपात्रंवामहस्तेकृत्वामोटकादिकमादाय ओं अद्या
मुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्य सांवत्सरिकैकोद्दिष्ट
श्राद्धे इदं पिण्डप्रत्यवनेजनन्तेस्वधेति पिण्डे प्रत्यवनेजनन्द
द्यात् ततो नीवींविस्रस्यसव्यं कृत्वाचम्य हरिंस्मरेत् अपसव्यं
कृत्वा वामेन पाणिना धृतं सूत्रंदक्षिणेनादाय ओं नमो वः
पितरो रसायइति मंत्रेण पिण्डोपरि सूत्रं दद्यात् ततः पिण्डंग
न्धादिभिः संपूज्य धूपदीपौच कारयेत् मोटकादिकमादायओं
अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूपाद्य सांवत्सरिकै
कोद्दिष्टश्राद्धे एतानि पिण्डार्चनानि अत्र द्रव्यसूत्रंगन्धपुष्पा-

दातधूपदीपैर्दावादिनैवेद्यताम्बूलयज्ञोपवीतादीनि ते स्वधेति
गन्धादिकमुत्सृजेत् ॥ ततो विप्रकरे ओं शिवा आपः सन्तु
इतिजलंओं सौमनस्यमस्त्विति पुष्पम् ओं अक्षतंचारिष्टमस्तु
इति तण्डुलान्दद्यात् ततः सव्येन पूर्वाभिमुखो भूत्वा वक्ष्य
माणमंत्रान् पठेत् ओं अपां मध्येस्थिता देवाः सर्वमप्युप्रति
ष्ठितम् ॥ ब्राह्मणस्य करेन्यस्ताः शिवा आपो भवन्तु मे १
लक्ष्मीर्वसति पुष्पेषुलक्ष्मीर्वसति पुष्करे ॥ लक्ष्मीर्वसति गोष्ठे
षुसौमनस्यं ददातु मे २ अक्षार्तं चास्तु मे पुण्यंशान्तिःपुष्टि
र्धृतिस्तथा ॥ यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदामम ३ ततः
कर्मपात्रोदकंकुशैर्गृहीत्वा प्रतिमंत्रम् स्वशिरस्यभिषिंचेत् ओं
अस्मत्कुलेदीर्घमायुरस्तु ओं शान्तिरस्तुपुष्टिरस्तुओंबृद्धिरस्तु
ओं यच्छ्रेयस्तदस्तु ओं यत्पापं तत्प्रतिहतमस्तु इतिभुमौओं

द्विपदेचतुष्पदेभ्यःशान्तिर्भवतुततोपसव्येनपिण्डशेषान्नंपिण्ड
समीपे विकिरेत् वामहस्ते पुटकादिस्थजलं कृत्वा मोटकादि-
कमादाय ओं अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणो वसुस्व
रुपस्याद्य सांवत्सरिकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमुप-
तिष्ठतां इति पिण्डेक्ष्योदकं दद्यात् ततः सव्येनकृतांजलिर्द
क्षिणां दिशमवलोकयन् ओं अघोरः पितास्त्विति पिण्डोपरि
पूर्वाग्रां जलधारांदद्यात्ततःप्राङ्मुखो भूत्वाञ्जलिबध्वाशिषः
प्रार्थयेत् ओं गोत्रन्नो वर्द्धतां ओं वर्द्धतां ओं दातारोनोऽभि
वर्द्धन्ताम् ओं वर्द्धन्तां ओं वेदा वर्धन्ताम् ओं वर्धन्ताम्ओं
सन्ततिर्वर्धताम् ओं वर्धताम् ओं श्रद्धा चनोमाव्यगमत् ओं
मागात् ओं बहुदेयं च नोस्तु ओं अस्तु ओं अन्नंचनोबहु
भवेत् ओं भवतु ओं अतिथींश्च लभेमहि ओं लभध्वं ओं

याचितारश्च नः सन्तु ओं सन्तु मा याचिष्मकंचन ओंमा
याचेथाः ओं एताः सत्या आशिषः सन्तु ओं सन्त्वतिप्रति
वचनम् ततो ब्राह्मणहस्तेन तिलकं कुर्यात् ओं य कामंकामयते
सोऽस्मै कामः समृद्ध् यतामिति मंत्रेण ततोऽपसव्येन सपवि-
त्रान्कुशान्नयुङ्नपात्रात्समादाय पिण्डोपरि निक्षिप्य ओं
स्वधां वाचयिष्ये ओं वाच्यतां इति प्रतिवचनान्तरम्रिक्तां
जलिना ओं अद्यामुकगोत्रास्मत्पित्रेऽमुकशर्मणे वसुस्व-
रुपायाद्यसांवत्सरिकैकोद्दिष्टश्राद्धे स्वधोच्यताम्ओंअस्तुस्वधा
ततः पयसादिसहितम् पुटकवामहस्तेकृत्वा ओं ऊर्ज्जम्वहन्तो
रितिमंत्रं पठित्वासपवित्रकुशोपरि दक्षिणाग्रां धारांदद्यात्ओं
ऊर्ज्जंवहन्ती रमृतङ्घृतम्पयः कीलालम्परिश्रुतम् स्वधास्थतर्प्प
यतमेपितृन ततोपसव्येन ओं पिण्डः सम्पन्नः ओं सुसम्पन्नः

ओं पिण्डमुत्थापयामि ओंउत्थापयस्व इत्यनुज्ञातः सन् नम्रीभूय पिंडमाघ्राय उत्थापयेत् पिण्डाधःकुशानुल्मुकं चावन्ह्वो क्षिपेत् सव्येन पिण्डिकायां शंखंचक्रं च लिखेत् ओं शंखाय नमः ओं चक्राय नमः इतियवैः शंखचक्रपूजां विधाय अपसव्यं कृत्वा ओं गयायां पितृरूपेण स्वयमेव जनार्दनः तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् इतिमंत्रेण पिण्डं पिण्डिकोपरि निधायसव्येन पूजयेदेभिमन्त्रैः ओं वसन्तायवमस्तुभ्यंग्रीष्माय च नमोनमः वर्षाभ्यश्च शरत्संज्ञऋतवे चनमो नमः हेमन्ताय नमस्तुभ्यं नमस्ते शिशिरायच माससंवत्सरेभ्यश्च दिवसेभ्यो नमोनमः ततोऽपसव्येनार्घपात्रमुत्तानीकृत्य सव्येन दक्षिणान्दद्यात् कुशतिलजलदक्षिणाद्रव्यमादाय अद्येत्यादिअमुकगोत्रस्यास्मत्पितुर मुकशर्मणोवसुस्वरुपस्या

द्यकृतैतत्सांवत्सरकैकोद्दिष्टश्राद्धपिण्डदानप्रतिष्ठासिद्ध्यर्थं दक्षि
णां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं यथाद्रव्यं यथा नाम
गोत्राय यथानामशर्मणे ब्राह्मणायतुभ्यमहंसम्प्रददे इतिविप्रकरे
दद्यात् पुनः कुशादिसहितदक्षिणाद्रव्यमोदाय ओंअद्येत्यादि
अमुकगोत्रस्यास्मत्पितुरमुकशर्मणोवसुस्वरुपस्याद्य कृतैतत्सा
म्वत्सरिकैकोद्दिष्टश्राद्धन्यूनातिरिक्तपरिपूर्णार्थंयद्दे यमन्नपाना
दिकं यथाद्रव्यं च यथा २ नामदैवतं नानानामगोत्रेभ्या
नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृ
जे ततोपसव्येन ओं अभिरम्यताम् ओंअभिरतास्म इतिप्रतिवच
नान्तेब्राह्मणंविसृज्यततोब्राह्मणस्य दक्षिणांगुष्ठंगृहीत्वोत्थाप्य
त्रिर्वारिधारयावेष्टयेत् ओं आमावाजस्य प्रसवोजगम्यादेमेद्या-
वापृथिवीविश्वरुपेआमागंता पितरामातराचामासोमोअमृतत्वे

नगम्यात् ॥ ततः सव्येन ओं देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच नमः स्वाहायै स्वधायै नित्यमेव नमोनमः ॥ इतित्रिः पठेत् ॥ अपसव्येन दीपमाच्छाद्य सव्यं कृत्वा हस्तौ पादौप्रक्षाल्याचम्य इतिपठेत् ओं यत्कृतंतत्सुकृतमस्तुयन्नकृतन्तद्विष्णोः प्रसादाट् ब्राह्मणवचनात्सर्वंपरिपूर्णमस्तु ओं अस्तु परिपूर्णम् ओं प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः १ आयुः प्रजां धनं विद्यां स्वर्गमोक्षसुखानि च। प्रयच्छंतुतथा राज्यंपितरः श्राद्धतर्पिताः २ कायेन वाचामनसेंद्रियैर्वा बुद्ध यात्मनावा प्रकृतिस्वभावात् करोमि यद्यत्सकलम्परस्मै नारायणायेति समर्पये तत् ३ इति मंत्रेणावशिष्टकुशादिकं कर्म पात्रस्थंश्राद्धभूमौत्यजेत् ओं यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनंसम्पूर्णतां

याति सद्यो वन्दे तमच्युतम् ४ चतुर्भिश्च चतुर्भिश्चद्वाभ्यां पञ्च भिरेवच हूयते च पुनर्द्वाभ्यां समे विष्णुः प्रसीदतु ॥

॥ इति साम्वत्सरिकैकोद्दिष्टश्राद्धविधिः ॥

॥ अथ पार्वणश्राद्धविधिः प्रारम्भः ॥

श्रीगणेशाय नमः ॥ श्राद्धकालः ॥ अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा ॥ अन्नदाने चतुर्थीस्याच्छेषाः संबुद्धयः स्मृताः ॥ आमश्राद्धन्तु पूर्वाण्हेएकोद्दिष्टं चमध्यतः पार्वणं चापराण्हेतु प्रातर्वृद्धिनिमित्तकमितिहारीतोक्तेः ॥ गृहाग्नि शिशुदेवानां ब्रह्मचारितपस्विनाम् ॥ तावन्न दीयते किञ्चि द्यावत्पिण्डान्ननिर्वपेत ॥ इति हेमाद्रिः रजस्वलां चपाखण्डां

पुंश्चलींपतितांतथा ॥ त्यजेच्छूद्रां तथावन्ध्यां विधवांचान्य
गोत्रजामिति पाकविचारः ॥ न कदाचित् पचेदन्नमय स्था-
लीषुपैतृकम् ॥ अयसोदर्शनादेवपितरोविद्रवन्तिहि ॥ एवंश-
स्त्रादीन्यपि पितृसन्निधौ न स्थापयेत् ॥ गोगजाश्वादिजुष्टेषु
कृत्रिमायां तथा भुवि ॥ नकुर्य्याच्छ्राद्धमेतेषु पारक्यादिसुभू-
मिषु ॥ अथवर्ज्यविप्रमाह भारते ॥ कितवोब्रह्महायद्मी
पशुपालोनिराकृतिः ॥ ग्रामप्रेष्यो वार्धुषिको गायकः सर्वविक्रयी ॥ पुरूरवामाद्रवश्चपार्वणे समुदाहृतौ ॥ येषामेतन्नज्ञानं तैः आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ॥ ये अत्र विहिताः श्राद्धेसावधाना भवन्तुते॥ एतच्छ्लोक उच्चारणीयः॥ सम्बन्धम्प्रथमं ब्रूयाद् गोत्रंनाम तथैव च ॥ पश्चाद् रूपं विजानीयात् क्रमएषः सनातनः ॥ सकारेणतु वक्तव्यंगोत्रं

सर्वत्र धीमताम् ॥ सकारः कुतपोज्ञेयस्तस्माद्यत्नेन तं वदेत् ॥
अन्नाभावे द्विजाभावे यद्येको ब्राह्मणो भवेत् ॥ पात्राण्यासादयेत्
त्रीणि न तु ब्राह्मणसंख्ययेतिमनुः । छन्दोगाजुहुयुः सव्येनापस
व्येनयाजुषाःइतिवृद्धयाज्ञवल्क्योक्तेः॥ पिण्डपितृयज्ञवहुत्वेत्विति
सामान्यातिदेशसत्वाच्चाऽपसव्येनैवकार्यम् एतेन स्वाहाशब्द-
स्यदेवकार्यप्रपूज्यमानस्यदर्शनात्सव्येनैवेतिवदन्तःपरास्ताः हो
मस्य वह्निपत्नीशब्दोच्चारणेन विनाऽसंभवेनभवेदुक्तस्यनरविषा
णायमानत्वात्॥ परकीयगृहे यस्तुस्वान् । पितृन्तर्पयेद्यदि॥तद्भवः
स्वामिनस्तस्य हरन्ति पितरोबलात् ॥ अग्रभागं ततस्तेभ्यो
दद्यान्मूल्यं चजीवनमित्युक्तेः श्राद्धार्हाणामग्रभागं शूद्राणां
तुमूल्यजीवनेदेये॥श्वशृगालखरैःस्पृष्टः पिंडोभिन्नः प्रमादतः ॥
कर्तुरायुष्यनाशःस्यात्प्रेतस्तंनोपसर्पतितद्दोषपरिहारार्थं प्राजा-

पत्यं प्रकल्पयेत् ॥ केतकीं तुलसीपत्रं बिल्वपत्रं च वर्जयेत् ॥
द्रोणंच करवीरं च धत्तूरं किंशुकंतथेति पृथ्वीचन्द्रोदयवचनाच्च-
द्यापि तुलसी न प्राप्ता तथापि ॥ तुलसीगन्धचाघ्राय पितरस्तु
ष्टमानसाः प्रयान्तिगरुडारूढास्तत्पदं चक्रपाणिनः ॥ इति पारि-
जातवचनात्पिंडेषु निवेदनं भवति न ब्राह्मणार्चनेषु इति विशेषः
मध्यान्हं खड्गपात्रं च तथा नेपालकंबलः रौप्यंदर्भास्तिलागा
वोदौहित्रश्चाष्टमःस्मृतः ॥ पार्वणेऽ पराण्हः इति मात्स्योक्तेः
एतेश्राद्धेप्रशस्ताः ॥ अथ पार्वणश्राद्धोपयोगि किञ्चिल्लिख्यते ॥
भाद्रशुक्ल पौर्णमास्यांप्रपितयामहात्परांस्त्रीनुद्दिश्यश्राद्धंकार्यम् ॥
नान्दीमुखानांप्रत्यब्दंकन्याराशिगते रवौ ॥ पौर्णमास्यान्तुक-
र्त्तव्यं वाराहवचनं तथेति हेमाद्रिवचनात् । पौर्णमासीषुसर्वासु
निषिद्धं पिंडपातनम् ॥ वर्जयित्वाप्रोष्ठपदीं यथा दर्शस्तथैवसा ॥ १६

इति गार्ग्यवचनाच्च॥कन्यागते सवितरि यान्यहानितु षोडश ॥
क्रतुभिस्तानितुल्यानिदेवोनारायणोब्रवीदितिब्राह्मणेऽवचनात् य
कन्यकान्वितः पक्षः सोत्यन्तं पुण्यमुच्यते इति कात्यायनवच
नात् मध्ये वा यदिवाप्यन्ते यत्र कन्यां व्रजेद्रविः॥ सपक्षस्स-
कल श्रेष्ठश्राद्धषोडशकंप्रतीतिबृद्धमनुवचनाच्चषोडशदिन श्रा-
द्धकालः पार्वणे। षोडशत्वं भाद्रपूर्णिमयासहेत्येकः पक्षः
आश्विनकृष्णप्रतिपदेतिद्वितीयः तिथिवृद्ध्यातृतीयः॥ नाद्यः ॥
पूर्णिमाँ प्रपितामाहात्परानुद्दिश्य नान्दी श्राद्धविधानेन
तस्यापितृ श्राद्धेनाङ्गत्वं नान्त्यापि पक्ष द्वितिथ्यावृद्धि
स्तत्रसप्तदशदिनप्रसंगेनैकस्मिन् श्राद्धानापत्तेः न च प्रतिपदा
षोडशत्वेतिथिवृद्धौ षोडशत्वहानिः॥ वृद्धेस्तस्मिन्नहन्येवांत-
र्भावात्। न चैतद्भवतः संभवति तिथिवृद्धया षोडशत्वमिति

व्याघातात् अवशिष्यते द्वितीयः पक्षः ॥ अन्हः षोडशकं यत्तु शुक्लप्रतिपदा सहेतिदेवलवचनात् । आषाढीमवधिकृत्य पञ्चमंपक्षमाश्रिताः ॥ कांक्षन्ति पितरः क्लिष्टा अन्नमप्यन्वहंजलतितिवृद्धमनुवचननाच्चा ॥ अत एव पौर्णिमास्यां श्राद्धंन तदंगमितिपूर्वोक्तमपिसंगतं भवतीतिदिक् ॥ विधवा पार्वणं ब्राह्मणद्वाराकुर्यात् ॥ विधवा कारयेच्छ्राद्धं यथाकालमतंद्रितेतिस्मृतिसङ्ग्रहात्स्वयं संकल्प्य विधवा कारयेत श्राद्धं पार्वणमिति प्रयोगपारिजातस्यार्थिकवचनाच्च ॥ महालयश्राद्धस्य षोडशदिने करणासंभवे कार्तिकदर्शे कार्यम् । येयं दीपान्विता राजन् ख्याता पंचदशी तिथिः तस्यांदद्याददत्तं चेतपितृभ्यो वैमहालये इति भविष्य वचनात् । तत्रप्यसंभवे वृश्चिकसंक्रान्तेः प्रागेवकर्तव्यं प्रमाणमाकरेद्रष्टव्यम् ॥ अथपार्वणश्राद्धानुक्रम-

णिकालिख्यते ॥ भूदेवस्य निमंत्रणं द्विजवरस्यार्घस्तः स्वा-
गतं प्रश्नश्चेति तदुत्तरं कुरुतथासेकं प्रतिज्ञाजपः। दिग्बंधासन
केपितृनथ पुनश्चावाहयेद्देवतंहस्तार्घस्तदधोमुखं कुरुपुनः पूजा
ततोमण्डलं १ प्रागग्नौकरणं धरापतिदतिः पात्रेवशेषंहवि-
स्तत्वन्नानां परिवेषणंमधुजपो मध्वाज्यदानादनु ॥ पात्रालंभन
मन्नदानमखिलंकृत्वान्नहीनं जपेदापो विप्रकरे कुशोपरिविशन्म
ध्वादिकं संपठेत् २ दानं वैकरकंद्विराचमनता सावित्रिमन्त्रो
मधुत्वापो विप्रकरेषु पिंडकरणेप्रश्नस्तथैवोत्तरम् ॥ वेद्यंगारक
शोधनं खलु तथा रेखावसेकस्ततो दर्भाणां प्रकरं प्रसार्य चत
था सव्येन देवंजपेत् ३ पिण्डस्यासहनाथ पिंडवपनंहस्तस्य
संप्रोक्षणं प्राग्वच्चाचमनंविचिन्त्य चपितॄन् पिंडावनेजो जलैः
नीव्या मोचनेताथ सव्यभवनंकुर्याद्धरेः संस्मृतिः सूत्रार्चाच-

ततोथचान्नवपनान्नव्यदानं ततः ४ सव्याघोरदतीवरार्थिभवनं
कुर्य्यात्स्वघ.वाचनं छोर्जपिंडकुशोल्मुकामलकृतिः पात्रोत्थि
तिर्दक्षिणा ॥ विप्राणां च विसर्जनं सुरजपोदीपः कराच्छदितः
कुर्य्यादाचमनं प्रमादपठनं श्राद्धस्यपूर्णः क्रमः ५ अथ श्राद्ध
विधिर्लिख्यते ॥ तत्र प्रथमं ब्राह्मणानां निमन्त्रणं ॥ कर्ता
शुचिराचांतः गोमयोपलिप्तेप्रांगणे दीपंप्रज्वल्याचम्य पूर्वाभि
मुखोभूत्वाविश्वेदेवब्राह्मणौप्रथमं निमन्त्रयेत् ॥ ताम्बूलादि
कंविप्रहस्ते दत्वा स्वबामपाणिना विप्रदक्षिणजानु स्पृष्ट्वास्व-
दक्षिणजानु च पातयित्वा स्वदक्षिणहस्तेनाधोमुखेनस्ता-
म्बूलादिकमुत्तानविप्रहस्तंगृहीत्वा ॐ अद्येत्यादि अमुकगो-
त्रणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां
सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्ध सम्बंधिनां विश्वेषां

देवानां पुरूरवोमाद्रवोनाम्नामद्य कर्तव्यमहालयापरपक्षान्तर्ग-
तपार्वणश्राद्ध अनेन ताम्बूलपुष्पाक्षतेन त्वं मया निमंत्रितः
ओं निमंत्रितोस्मीतिप्रतिवचनम् । पुनस्तत्सर्वंपूर्ववद्विधाय
ओं अद्येत्यादि अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्ध
प्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रा-
दित्यस्वरूपाणां श्राद्धसंबन्धिनां विश्वेषां देवानां पुरुरवोमा
द्रवोनाम्नामद्य कर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धेऽने
न ताम्बूलपुष्पाक्षतेनत्वं मय निमन्त्रितः ॐ निमंत्रितोस्मीति
प्रतिवचनं ततोऽपसव्यंकृत्वा ताम्बूलादिकं विप्रहस्तेदत्वा
दक्षिणाभिमुखाभूत्वा वामहस्तेन पितृब्राह्मणस्य दक्षिण
जानुस्पृष्ट्वा स्ववामजानु पातयित्वा अधोमुखेन स्वदक्षिण
करेण ताम्बूलादिसहितमुत्तानं विप्रकरं गृहीत्वा निमंत्रयेत् ।

ॐ अद्येत्यादि अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहा-
नाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरू-
पाणां अद्य कर्तव्य महालयापरपक्षान्तर्गतपार्वण श्राद्धे
अनेन ताम्बूलपुष्पाद्यतेन त्वं मया निमन्त्रितः ॥ ॐ निम-
न्त्रितोस्मीति प्रतिवचनम् ओं अद्येत्यादि अमुकगोत्राणा-
मस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्म
णां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्य कर्तव्य महा-
लयापरपक्षांतर्गतपार्वणश्राद्धे अनेन ताम्बूलपुष्पाद्यते-
नत्वंमया निमंत्रितः ॐ निमन्त्रितोस्मीतिप्रतिवचनम् ॐ
अक्रोधनै शौचपरैः सततं ब्रह्मवादिभिः । भवितव्यंभवद्भिश्च
मया च श्राद्धकारिणा ॥ १ ॥ सर्वायासविनिर्मुक्तैः कामक्रो
धविवर्जितैः । भवितव्यं भवद्भिर्नोद्यतने श्राद्धकर्मणि २

ॐ भवितव्यमिति प्रतिवचनम् ततः पव्येन विश्वेदेवब्राह्मणयो-
श्चरणान् प्रक्षालयेत् ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपा-
दाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषायशाश्वतेसहस्रकोटीयु-
गधारिणेनमः ॥ ॐ नमोब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ पाद्यपात्रंवामह
स्तेकृत्वा शन्नोदेवीइतिमन्त्रं पठित्वा कुशादिकमादाय अद्या
मुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकश-
र्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहा
लयापरक्षांतर्गतपार्वणश्राद्धे श्राद्धसंबंधिनो विश्वेदेवाः पुरू
वोनामानः एष पादार्घोवः स्वाहा पुनः सर्वपूर्ववत्कृत्वा
कुशादिकमादाय ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमाता
महवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानाम्व-

सुरुद्रादित्यस्वरुपाणां अद्य कर्त्तव्यमहालयापरपक्षांतर्गतपार्वण श्राद्धे श्राद्धसंबंधिनो विश्वेदेवाः पुरूरवोमाद्रवोनामान एष पादार्घोवः स्वाहा ततोऽपसव्येन पितृब्राह्मणयोश्चरणान्प्रक्षालयेत् । नमोस्त्वनन्तायेत्यादिना । यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डवश्रेष्ठविप्राणांपादशौचने इति मन्त्रं पठित्वा पाद्यपात्रं वामहस्ते कृत्वा शन्नोदेवो इतिमंत्रं पठित्वा मोटकमादायॐ अद्यामुकगोत्राःअस्मत्पितृपितामहप्रपितामहाः अमुकामुकामुकशर्माणःसपत्नीकाःवसुरुद्रादित्यस्वरूपाः अद्य कर्तव्यमहालयापरपक्षांतर्गतपार्वणश्राद्धे एषपादार्घत्रेधाविभज्य युष्मभ्यं स्वधा पुनःसवंपूर्ववत् कृत्वामोटकमादायॐ अद्यामुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकाःवसुरुद्रादित्यस्वरूपाः अद्य कर्तव्य महा-

लयापरपक्षांतर्गतपार्वणश्राद्धे एष पादार्घः त्रेधा विभज्य युष्मभ्यं स्वधा । ततः सव्येनाचम्य गृहं प्रवेसयेत् । ॐ आगता यूयं ॐ सुस्वागता वयं इदमासनमास्यताम् ॐ आस्ये इति प्रतिवचनम् ॐ भूर्भुवःस्वः इतिमंत्रेण विश्वेदेवब्राह्मणौ पूर्वाभिमूखौ उपवेशयेत् ततोपसव्येन ॐ आगता यूयं ॐ सुस्वागता वयं ॐ इदमासनमास्यताम् ॐ आस्ये इतिप्रतिवचनम् ॐ भूर्भुवःस्वरितिमंत्रेण पितृब्राह्मणौउदङ्मुखौ उपवेशयेत् सर्वत्र प्रश्नेषु पंक्तिमूर्धान्यं पृच्छेत् ततः सव्येन ओं कर्मपात्रमेहं करिष्ये ओं कुरुष्वेत्यनुज्ञातः सन् ओंयद्देवादेवहेडनमितिमन्त्रत्रयेण देवकर्मपात्रं कुर्यात् ॥ यद्देवादेवहेडनं देवासश्चकृमा वयम् ॥ अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् वायुर्मातस्मादे

नसो विश्वान्मुञ्चत्व ठं हसः यदि जाग्रद्यदि स्वप्नमेना ठं
सिचकृमा वयं ॥ सूर्योमातस्मादेनसो विश्वान्मुञ्चत्व ठं हसः
पवित्रेस्थो इतिमंत्रेण पवित्रं क्षिपेत्॥शन्नोदेवीरितिमंत्रेण
जलं ॥श्रीश्चते इतिमंत्रेण पुष्पं ॥ यवोसीतिमंत्रेण यवम् ॥
अपसव्यं कृत्वा ओं कर्मपात्रमहंकरिष्ये ओं कुरुष्वेत्यनुज्ञातः
सन् ओं यद्दे वादेवहेडनमितिमंत्रत्रयेण पितृकर्मपाणं कर्तव्यंप
वित्रेस्थो इतिमत्रेण मोटकादिपवित्रं क्षिपेत्॥तिलोसीतिमंत्रेण
तिलान् ॥ श्रीश्चते इतिमंत्रेण पुष्पं गंधद्वारामिति गंधम् ॥
ततःसव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय ओं अपवित्रः
पवित्रोवासर्वावस्थांगतोपिवा। यःस्मरेत्पुन्डरीकाक्षं सबाह्या
भ्यन्तरः शुचिःओं पुन्डरीकाक्षः पुनात्वित्युक्त्वा श्राद्धदेशो
द्रव्याण्यात्मानं च सिञ्चेत्तिलकुशादिकमादाय ओं अद्येत्या

दिअमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुका-
मुकशर्मणां सपत्नीकानां वसुरुद्रादित्यरूपाणां तथामुकगोत्राणा
मस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुका मुकशर्म
णां सपत्नीकानां वसुरुद्रादित्यस्वरुपाणांपुरूरवोमाद्रवोनान्मांवि
श्वेदेवपूर्वकाणामद्यकर्त्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धमे
मिद्रव्यैरहंकरिष्ये इतिप्रतिज्ञाकुर्यात् तत दवताभ्यः पितृभ्यश्च
महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायैनित्यमेव नमोनमः
इतित्रिः पठित्वा ओं सप्तव्याधादशारण्ये मृगाः कालञ्जरे
गिरौ चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे तेपिजाताः कुरु
क्षेत्र ब्राह्मणा वेदपारगाः प्रस्थिता दीर्घमध्वानं यूयंकिमवसोद-
थ २ येविप्रमुख्याकुरुजांगलेषु जातास्तथा दासकुलेमगाश्च
कालंजरे सप्त च चक्रवाका ये मानसे ते वयमत्रसिद्धाः ३ पंच

क्रोशंगयाक्षेत्रं क्रोशमेकं गयाशिरः ॥ यत्रयत्र स्मरेद्विद्वान्पि
तृणां दत्तयत्नम् ४ श्राद्धभूमौ गयां ध्वात्वा तथादेवं गदाध
रम् उभाभ्यां च नमस्कृत्यततः श्राद्धं समारभेत् ॥ गया
गया गयादित्यो गायत्री च गदाधरः गयागयासुरश्चैव षड्
गया मुक्तिदायकाः ईशानविष्णुकमलासनकार्तिकेयवह्नित्र-
यार्करजनाशगणेश्वराणाम् क्रौञ्चामरेन्द्रजलशोद्भवकश्यपीनां
पादान्नमामि सततं पितृमुक्तिहेतोः । ततोऽपसव्येन दिग्बंधनं
कुर्यात् तिलसहितमोटकमादायतिलान्पूर्वादिक्रमेण वक्ष्यमाण-
मंत्रैर्विकिरेत् ओं अग्निष्वात्ताः प्राचीं रक्षान्तुमे दिशम् अप-
हता असुरारक्षा ठं सिव्वेदिषदः ओं तथाबर्हिषदः पांतुयाम्यां
ये पितरः स्थिताः अपहता असुरारक्षा ठं० सिव्वेदिषदः ओं
प्रतीचीमाज्यपास्तद्वत । अपहताअसुरारक्षा ठं० सिवेदिषदः ओं

उदीचीमपि सोमपाः अपहता असुरारक्षा ठं० सिव्वेदिषदःओं
उद्ध्र्वं तस्त्वर्यमा रक्षेत्कव्यवाडनलोप्यधः क्षोभूतपिशाचेभ्यस्त
थैवासुरदोषतः सर्वतश्चाधिपस्तेषां यमो रक्षांकरोतुमेअथनीवी
बन्धनमपसव्येनैव निहन्मिसर्वंयदमेध्यवद्भवेद्धताश्चसर्वेऽसुरदा
नवामया । रक्षांसियक्षासपिशाचगुह्यकाहतामया यातुधानाश्च
सर्वे प्रयांतु दूरतःसर्वेदैतेयादानवास्तथा । सर्वविघ्नोपशान्त्यर्थं
क्षिपामिच कुशान्तिलान् इति तिलसहितकुशंदक्षिणस्यांक्षिपेत्
इतिदिग्बंधनीवीबन्धने ततःसव्येन ॥ नमो नमस्तेगोविन्दपुरा
णपुरुषोत्तम । इदंश्राद्धंहृषीकेश रक्षातांसर्वतोदिशः ॥इतिरक्षार्थं
विष्णुस्मरणम् । अथासनम् सव्येनैवकुशमादाय ओंअद्यामुक
गोत्राणां अस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकश-
शर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरुपाणां श्राद्धसंबन्धिनां

विश्वेषां देवानांपुरूरवोमाद्रवोनाम्नामिदं कौशमासनंवः स्वाहा पुनःकुशमादाय ओं अद्यामुकगोत्राणामस्मन्मातामहप्रमाता महवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसु रुद्रादित्यस्वरूपाणांश्राद्धसम्बंधिनांविश्वेषांदेवानांपुरुर वोमाद्र वोनाम्नां इदं कौशमासनंवः स्वाहा इतिदेवब्राह्मणयकुशरुप मासनं दद्यात् ततोऽपसव्यंकृत्वा मोटकमादाय। अद्यामुकगोत्र णामस्मत्पितृपितामहप्रपितामहा नाममुकामुकामुकशर्मणांसप त्नीकानांवसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालया परपक्षांत— र्गतपार्वणश्राद्धेइदं मोटकरूपमासनंत्रेधाविभज्ययुष्मभ्यंस्व- धा पुनर्मोटकमादाय ओं अद्यामुकगोत्राणामस्मन्मातामहप्रमा- तामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणांसपत्नीकानांवस्व रुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालया परपक्षातर्गतपार्वणश्राद्धे

इदं मोटकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वाधा ततःसव्येन
अञ्जलिबध्वा विश्वेदेवानावाहयेत् ओंअद्यामुकगोत्राणामस्मत्
पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां
वसुरुद्रादित्यस्वरुपाणा॥तथामुकगोत्राणामस्मन्मातामहप्रमाता
महवृद्धप्रमातामहानाममुकामुकामुकशर्मणांसपत्नीकानांवसुरु-
द्रादित्यस्वरुपाणामद्यकर्तव्यमहालयापरपक्षांतर्गतपार्वणश्राद्धे
श्राद्धसम्बंधिनोविश्वान्देवान्पुरुरवोमाद्रवोनाम्नः आवाहयिष्ये
ओं आवाहयेति प्रतिवचनम् ओं विश्वेदेवास आगतशृणुता-
मइमर्ठ० हवंएदं बर्हिर्निषोदत इतिमन्त्रेणावाह्य ओं यवोसि
यवयास्मद्द्वेषोयवयारातीरितिमन्त्रेणाश्राद्धदेशेयवान्विकीय
ओं विश्वेदेवाः शृणुतेम ठ० हवम्मे येअन्तरिक्षेयउपद्यविष्ठये
अग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वम् इति

मन्त्रं पठित्वा ओं आगच्छन्तु महाभागा विश्वेदेवा महा
बलाः ये यत्र विहिताः श्राद्धे सावधाना भवन्तुनेततोपसव्ये
नांजलिंबध्वापितॄनावाहयेत् ओंअद्यामुकगोत्रानस्मत्पितृपिता
महप्रपितामहानमुकामुकामुकशर्मणः सपत्नीकान् वसुरुद्रादि
त्यस्वरुपान् तथामुकगोत्रानस्मन्मातामहप्रमातामहवृद्धप्रमाता
महान् अमुकामुकामुकशर्मणः सपत्नीकान्वसुरुद्रादित्यस्वरुपा
नद्यकर्तव्यमहालयापरद्यान्तर्गतपार्वणश्राद्धे आवाहयिष्येओं
आवाहयेति प्रतिवचनम् उशन्तस्त्वानिधीमह्यु शन्तः समिधी-
महि उशन्नुशत आवहपितन्हविषे अत्तवे इति मन्त्रेणावाह्य
ओं अपहताअसुरारक्षा ६ठं. सिव्वेदिषदः इतिं मन्त्रेण श्राद्ध-
देशे तिलान्विकीर्य ओं आयंतुनः पितरः सोम्यासोग्निष्वात्ता
पथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदन्तो धिब्रु वन्तुतेवंत्व

स्नान् इतिमन्त्रंपठेत् ततः सव्येन विश्वेदेवब्राह्मणौ पृच्छेत् ओं हस्तार्घपात्रं अहंकरिष्ये ओं कुरुष्वेत्यनुज्ञातः सन्पुटक द्वयमग्रे कृत्वा ओं पवित्रेस्थोवैष्णव्यौ सवितुर्व्वः प्रसव उत्पु नाम्यच्छिद्रेणपवित्रेण सूर्यस्यरश्मिभिः इतिमंत्रेण पूर्वाग्रे पुट कद्वये धारयेत् ओं शन्नोदेवी इति मंत्रेण पुटकद्वयेजलं क्षपेत् ओं यवोसि इतिमंत्रेणयवान्क्षिपेत् श्रीश्चतेलक्ष्मीरितिमन्त्रेण तत्रैव पुष्पाणि क्षिपेत् ओं सन्धद्वारांदुराजधर्षानित्यपुष्टां करी षिणीम्ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियामितिमन्त्रेणातत्रैव गन्धं क्षिपेत् ओं हस्तार्घपात्रं संपन्नमितिदेवब्राम्हणंपृच्छेत् ओं सुसंपन्नमिति तेनोक्ते ओं हस्तार्घपात्रमुत्थापयामि ओं उत्थापयस्वेति वचनानन्तरम् हस्तर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं गृहीत्वा ओं नमोनारायणायेति मन्त्रेण

विप्रकारे पुष्पसहितंपूर्वाग्रंपवित्रं धृत्वादक्षिणकरेणवामकराथ
पुटकमुखं विधाय ओं यादिव्या आपः पयसासम्बभूवुर्या आं
तरिक्षाउनपार्थवीर्याः हिरण्यवर्णायज्ञियास्तान आपः शिवाः
स ठ. स्योनासुहवाभवन्तुइतिमन्त्रेणार्घ पात्रस्थजलमभिमन्त्र्य
कुशयवजलान्यादाय ओं अद्यमुकगोत्राणा मस्मत्पितृपितामह
प्रपिता महानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्य महालयापर पक्षांतर्गतवार्षिकश्राद्धेश्रा
द्धसम्बंधिनो विश्वेदेवाः पुरूरवोमावोनामानः एषहस्तार्घोवः
स्वाहा इतिदेवब्राम्हणकरे अर्घ्यं दद्यात् अर्घेप्रत्यर्घमस्तु तद
र्घपात्रं भूमौ धृत्वाअपरार्घपात्रं वामहस्तेकृत्वासर्वंपूर्ववदेव
विधाय यवजलकुशानादाय ओं अद्यामुकगोत्राणामस्म-
न्मातामहप्रमातामहवृद्धप्रामातामहानाममुकामुकामुकशर्मणांस

एतीकानां वसुरुद्रादित्यस्वरूपाणां अद्यकर्तव्यमहालयाप-
रपक्षांतर्गपार्वणश्राद्धे श्राद्धसंबन्धिनो विश्वेदेवाः पुरू-
वोमाद्रवो नामानः एषहस्तार्घोवः स्वाहा इतिदेवब्राह्मणकरे
अर्घंदद्यात् अर्घेमत्यर्घमस्तु तदर्घपात्रद्वयस्यजलेन ओं
तच्चक्षुरितिमंत्रेण चक्षुस्पर्शः तदनंतरं पवित्रसहितअर्घपात्रे-
स्वस्वविश्वेदेवदक्षिणापार्श्वे ओं विश्वेभ्यो देवेभ्यः स्था-
नमसीतिवाक्येन देवार्घपात्रे उत्तानेस्थापयेत् ततोपसव्येन
ओं हस्तार्घपात्राण्यहं करिष्ये इतिपितृब्राह्मणं पृच्छेत् ओं
कुरुष्वेत्यनुज्ञातः सन् पित्रादिमातामहाद्यर्घपात्रार्थस्वाग्रमेक-
मेकं पुटकमासाद्य तयोः पुटकयोर्दक्षिणसंस्थं पुटकद्वयमा-
साद्यतेषु पुटकेषुटसु ओं पवित्रेस्थोवैष्णव्यौ सवितुवः
प्रसवउत्पुनाम्यच्छिद्रेणपवित्रेण सूर्य्यस्यरश्मिभिः इतिमंत्रेण

उत्तराग्राणि पवित्राणि धारयेत् ओं शन्नोदेवीरितिमंत्रेणं तत्र
जलं क्षिपेत् ओं तिलोसिसोमदैवत्यो गोसवो देवनिर्मित ।
प्रत्नमद्भिः पृक्तः स्वधयापितल्लोकान्पृणाहिनः स्वाहा इतिमं
त्रेण तिलान्क्षिपेत्ओंश्रीश्चतेलक्ष्मीरितिमंत्रेणपुष्पाणिक्षिपे
त् ओंगंधद्वारामितिमन्त्रेण चन्दनंक्षिपेत्ओंहस्तार्घपात्राणि
संपन्नानि इतिपितृब्राह्मणं पृच्छेत् हस्तार्घपात्राणिसुसंपन्नानि
इतितेनोक्ते ओं हस्तार्घपात्रमुत्थापयामि ओं उत्थापयस्वेति
बचनानंतरम् प्रथमंपित्रर्घपात्रं वामहस्तेकृत्वा ओं नमो
नारायणायेति मंत्रेण विप्रकरे सपुष्पमुत्तराग्रं पवित्रंधृत्वावाम
करस्थहस्तार्घपात्रमुखं दक्षिणकरेण पिधाय ओंयादिव्याआपः
पयसा संबंभवुर्या अन्तरिक्षा उतपार्थबोर्याः हिरण्यवर्णायज्ञि
यास्तानआपःशिवाःस ठ्स्योनासुहवाभवन्तु इति मंत्रेणार्घ

पात्रस्थजलमिमंत्र्य तिलजलमोटकमादाय ओं अद्यामुकगोत्रा
स्मत्पितरमुकशर्मन्सपत्नीकवसुस्वरूपाद्यकर्तव्यमहालयापरप-
क्षांतर्गतपार्वणश्राद्धेएषहस्तार्घस्तेस्वधा॥इतिब्राह्मणकरेदद्यात्
ओं अर्घेभत्यर्घमस्तुतदर्घपात्रं भूमौधृत्वाएवंयथाक्रमेण पिता
महादिभ्यः पंचभ्यो दद्यात् ततः प्रपितामहार्घपात्रस्थलादि
कंपितामहार्घपात्रेकृत्वातत्सर्वंपित्रर्घपात्रेकृत्वापित्रर्घपात्रमुत्तानं
कृत्वापितामहार्घपात्रीपरिधृत्वातदुभयपात्रमुत्तानंपतितामहार्घ
पात्रोपरिधृत्वा एवं मातामहार्घ पात्राणिकृत्वासव्यंकृत्वातत्र
स्थजलेन ओं तच्चक्षुरितिमंत्रेण चक्षुः स्पर्शःकार्यः ततोपसव्येन
एकत्रकृतंपित्रर्घपात्रंगृहीत्वापितृद्विजजस्यासनवामभागेओंपित्रृ
भ्यः स्थान मसीतिन्युब्जं कुर्यात् तदुपरिकुशत्रयंदद्यात्। एव-
मेकत्रकृतंमातामहाद्यर्घपात्रंगृहीत्वामातामहद्विजस्यासनवाम-

भागे मातामहेभ्यः स्थानमसीतिन्युब्जं कुर्यात् तदुपरि कुश
त्रयं दद्यात् ततः सव्येन ओं अर्चयिष्ये इति देवब्राह्मणौ
ब्रूयात् ओं अर्चयेत्युक्ते गन्धपुष्पाक्षततताम्बूलयज्ञोपवीत
वस्त्रादिभिः समभ्यर्च्यधूपदीपौच कारयित्वाकुशादिकमादाय
ओं अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुका
मुकामुकशर्मणांसपत्नीकानां वसुरुद्रादित्यस्वरूपाणां अद्यकर्त
व्यमहालयापरपक्षांतर्गतपार्वणश्राद्धेश्राद्धसम्बन्धिनोविश्वेदेवाः
पुरूरवोमाद्रवोनामानः एतान्यर्चनानि अत्र गन्धपुष्पाक्षतधू
पदीपनैवेद्यताम्बूलयज्ञोपवीतवासांसि वः स्वाहा इत्युत्सृ
जेत् पुनः कुशादिकमादाय ओंअद्यामुकगोत्राणामस्मन्माता
महप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नी-
कानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षांतर्गत

पार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोना
मान एतान्यर्चनानि अत्रगंधपुष्पोद्दातधूपदीपनैवेद्यताम्बूलय
ज्ञोपवीतवासांसि वः स्वाहा इत्युत्सृजेत् ततोपसव्येन ओं
अर्चयिष्ये इति पितृब्राह्मणौ पृच्छेत् अर्चयेत्युक्ते गंधादिभिर
भ्यर्च्य मोटकादिकमादाय ओं अद्यामुकगोत्रा अस्मत्पितृपिता
महप्रपितामहा अमुकामुकामुकशर्माणःसपत्नीकाःवसुरुद्रादित्य
स्वरूपाअद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धेएतान्यर्चन
नान्यत्र गंधपुष्पोद्दातधूपदीपनैवेद्यताम्बूलयज्ञोपवीतवासांसि
त्रेधा विभज्य युष्मभ्यं स्वधा पुनर्मोटकमादाय अद्यामुकगो-
त्रास्मन्मातामहप्रमातामहवृद्धप्रमाता महाश्रमुकामुकामुकशर्मा
णः सपत्नीकाः वसुरुद्रादित्यस्वरूपा अद्य कर्तव्यमहालयाप
रपक्षान्तर्गतपार्वणश्राद्धेएतान्यर्चनान्यत्रागन्धपुष्पोद्दातधूपदी

पनैवेद्यताम्बूल यज्ञोपवीतवासासि त्रेधा विभज्य युष्मभ्यं
स्वधा । सव्येन विश्वेदेवब्राह्मणहस्तयोः ओं अर्चनविधेः
सर्वपरिपूर्णमस्तु इतिजल दद्यात् अस्त्विति प्रतिवचनं अप
सव्येन पितृब्राह्मणहस्तयः अर्चनविधेः सर्वपरिपूर्णमस्तु
इति जलं दद्यात् ॐ अस्त्विति प्रतिवचनम् सव्येन देव
ब्राह्मणयोर्भोजनस्थाने चतुर्दिक्वासनसहितं चतुष्कोणमंडलं
कुर्यात् अपसव्येन पितृब्राह्मणयोर्भोजनस्थाने चतुर्दिक्वासनस
हितं चतुःकोणमंडलं कुर्यात् अपसव्येनैवाग्नौकरणं दक्षिणा
भिमुखःप्राचीनावीती पातितवामजानुःपुटकादौसघृतमन्नंकृत्वा
ओं अग्नौकरणमहं करिष्ये इतिपितृब्राह्मणं पृच्छेत् ओंकुरुष्वे-
त्यनुज्ञातस्सन्पितृब्राह्मणकरेजलपात्रेवाजुहुयात् ओंअग्नयेक-
व्यवाहनाय स्वाहाइदमग्नयेकव्यवाहनाय ओं सोमायपितृमते

स्वाहा इदंसोमायपितृमतेइत्याहुतिद्वयंजुहुयातहुतशेषान्नम्स
व्येनविश्वेदेवब्राह्मणपात्रोपरि क्षिपेत् अपसव्येनपितृब्राह्मणपात्रे
षुक्षिपेत् ततोपसव्येनैव तिलघृतमधुजलयुतमोटकादिसहितमन्न
मादाय दक्षिणाभिमुखो भूत्वा ओंइदमन्नंसजलमेतद्धु स्वामि
पितृभ्यो नमः इत्ययुत्सृजेत् अथान्नसंकल्पःसव्येनतत्रविश्वेदेवा
न्ध्यायन्सोपस्करं यवजलयुतमन्नमुपनीय मधनाभिघार्यऋजु
हस्ताभ्यामन्नपात्रामालभ्य ओं पृथिवीते पात्रं द्यौरपिधानं
ब्राह्मणस्य मुखेअमृते अमृतंजहोमि स्वाहा ओं इदंविष्णुरि
त्यादिसुरेइत्यंतंच पठित्वा कृष्णकव्यमिदं रक्षामदीयमिति
पठित्वा विप्रदक्षिणाकरंगृहीत्वा ओं इदमन्नमित्यन्ने ओं
इमाआपइतिजले ओंइदमाज्यमितिघृते ओं इदं हविरिति
पुनरन्ने ओं एतान्युपकरणानि इति क्रमेणान्नजलघृतेषुविप्रकरं

निवेश्य ओं यवोसियवया इतिमन्त्रेणयवान्नोपरि विकीर्य
कुशयवजलान्यादय वामहस्तांगुल्यंगुष्ठैः क्रमेणान्नमपश्च
स्पृष्ट्वा ओं अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहा
नाममुकामुकामुकशर्मणां सपत्नीकानांवसुरुद्रादित्यस्वरूपाणां
श्राद्धसंबन्धिभ्यो विश्वेभ्योदेवेभ्यः पुरूरवोमाद्रवोनामभ्य अद्य
कर्तव्यमहालयापरपक्षांतर्गतपार्वणश्राद्धे इदमन्नं सजलंसो
पस्करंपरिविष्टं परिवेष्यमाणंअक्षय्यतृप्तिहेतोर्वः स्वाहाइति
कुशादिकमुत्सृजेत् पुनः सर्वपूर्ववद् विधाय कुशादिकमादाय
ओं अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहा
नाममुकामुकाशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरुपाणां
श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यं पुरुरवोमाद्रवोनामभ्यअ
द्यकर्तव्यम हालयापरमक्षांतर्गतपार्वण श्राद्धेइदमन्नंसजधलंसो

स्करं परिविष्टं परिवेष्यमाणमक्षय्यतृप्तिहेतोर्वः स्वधा इतिकु
शादिकमुत्सृजेत् । ततोऽपसव्येन सोपस्करं तिलजलयुतमन्नमु
पनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यांपाणिभ्यामन्न
पात्रमालभ्य ओं पृथिवीते पात्रंद्यौरपिधानंइत्तादिस्वाहान्तं
पठित्वाविप्रदक्षिणांगुष्ठं गृहीत्वाओंइदमन्नं ओंइमाआपःओं
इदमाज्यंओंइदंहविरिति पुनरन्नेओं एतान्युपकरणानीतिक्रमे-
णान्नजलघृतेषु विप्रदक्षिणांगुष्ठं निवेश्य ओं अपहता असुरा
रक्षार्थ० सिव्वेदिषदइत्यन्नोपरितिलान्विकीर्यमोटकादीन्यादाय
वामहस्तांगुष्ठांगुलिभिः क्रमेणान्नमपश्चस्पृष्ट्वा ओंअद्यामुकगो
त्रायास्मत्पितरेऽमुकशर्मणे सपत्नीकायवसुस्वरुपाय अद्यकर्त
व्यमहालयापरपक्षांतर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं
परिविष्टं परिवेष्यमाणमक्षय्यतृप्तिहेतोस्तेस्वधा इति पितृब्राह्म-

णसमीपेभूमौमोटकादिकमुत्सृजेत् एवं पितामहादिभ्यपञ्चभ्यः
दद्यात् ॥ ततः सव्येनदेवब्राह्मणकरयोः ओंभवंतौप्राशयेतामि
त्यपोशानं दद्यात् अपसव्येन पितृब्राह्मणकरेषु ओं भवंतः
प्राशयंतु इत्यपोशानं दत्वा सव्येन श्राद्धकर्ताकुशोपरि विशन्
ओं मधुन्वाता ओं मधुनक्त ओं मधुमान्नः इतिपठित्वामधु
३ ओं अन्नहोनं क्रियाहीननं विधिहीनं च यद्भवेत् । तत्सर्व-
मच्छिद्रमस्तु श्रीभास्करप्रसादतः ॐ नमस्तुभ्यं विरुपाक्ष नम
स्तेऽनेकचक्षुषे । नमः पिनाकहस्तायवज्रहस्ताय वैनमः ॥
इतिपठेत् । यथासुखं जुषध्वमितिवचनानंतरं तेब्राह्मणा मौनि
नोभूत्वाभुंजोरन्संज्ञयाच भक्ष्यंप्रार्थयेयुः ततः सव्याहृतिकां-
गायत्रीजपित्वामधुव्वातेतिऋचश्चपठित्वापितृसूक्तं चपठेत्वा ३३
तदेवं ९६ अग्नये कव्यवाहनाय षट् ६ कृष्णुष्वपाजइतिपञ्च

५ सुरावंतामित्यादि अपांफेनेत्यंत ६६ सहस्रशीर्षेतिषोडश
१६ नमस्ते इति समस्तम् आशुः शिशानः द्वादश १२ इति
पितृसूक्तंपठेत् ब्राह्मणाना यत्रयत्रेच्छोपलभ्यते तत्तत् प्रयच्छ
न्मन्दंमन्दं भोजयेत् ततः पितामहान्नपात्रसंधिनौ आस्तृ
तदक्षिणाग्रकुशत्रयायां भूमौ अपसव्येन मोटकादि क्रमादाय
विकिरासनं दद्यात् असंस्कृतप्रमीतानां त्यागिनां कुलयोषि-
ताम् उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् इतिमन्त्रेण
मोटकरूपमासनमस्तृतकुशोपरि उत्सृजेत् सतिलघृतमन्नमादाय
जलेनाप्लाव्य मोटकादिकं चोदाय अग्निदग्धाश्चये जीवा
येप्यदग्धाः कुलेमम । भूमौदत्तेनतृप्यन्तुतृप्तयान्तुपरांगतिम्
इतिमन्त्रेणस्तृतकुशोपरि अन्नं विकिरेत् ततः कुशान्परित्यज्य
हस्तौ पादौ प्रक्षाल्य सव्येन द्विराचम्य गायत्रीजपित्वा मधु

वाताइत्यादि पठेत् ततोब्राह्मणान् तृप्तानज्ञात्वा ओं जगण्डू-
षमिन्द ते २ इति उभाभ्यां विश्वेदेवब्राह्मणाभ्यां प्रत्येकंप्रत्यप
शानं शद्यात् दव्येनैवांजलिं वध्वा विश्वेदेवब्राह्मणौ प्रतिप्रश्नः
ॐतृप्तास्थॐतृप्तास्मइतिप्रतिवचनंॐशेषमन्नंकिंक्रियतामिति
प्रश्नः इष्टैः सहभुज्यतामितिप्रतिवचनं अपसव्येन ॐ जगंडू-
षमेदन्ते २ इति पितृब्राह्मणाभ्यां प्रत्येकं प्रत्यप शानं दद्यात्
अपसव्येनैवपितृब्राह्मणो प्रतिप्रश्नऽॐतृप्तास्थॐतृप्तास्मेति
प्रतिवचनम् ॐ शेषमन्नं किं क्रियतां ॥ ओं इष्टैः सहभुज्य-
तामिति प्रतिवचनं पिण्डदानमहंकरिष्ये इतिउभयत्र पृच्छेत्
ओंकुरुष्वेत्यनुज्ञातः मन् ततःपिण्डदानर्थं हस्तैकपरिमितां
चतुरस्रां चतुरंगुलोच्छ्रितां सैकतादिकां दक्षिणप्लवांपिण्डिकां
निर्माय तदुपरि ओं ये रूपाणिप्रतिमुञ्चमाना असुराः सन्तस्व

धयाचरन्तिपरापुरोनिपुरोजेभरन्त्यभिष्टांल्लोकात्प्रणुदात्यस्मान्
इति मंत्रेणांगारंभ्रामयित्वातदंगारंदक्षिणस्यांक्षिपेत्ततःपिंडि
कामध्येवामेन पाणिनदर्भपिञ्जुलींगृहीत्वादक्षिणाहस्तेकृत्वा
सव्योपगृहीतदक्षिणपाणिना ओं अपहताअसुरारक्षा ऊं
सिव्वेदिषद् इतिमंत्रेण दक्षिणाग्रेखाद्धयं कृत्वा दर्भपिञ्जुली
मुत्तरस्यां क्षिपेत् ततो जलेन पिंडिकासेचनन् तदनुछिन्न-
मूलकुशान् पिण्डिकायां दद्यात् ततः सव्येन ओं देवताभ्य
इतित्रिःपठेत् अपसव्यं विधाय एकं पुटकंवामहस्तेकृत्वामोट
कादिकमादाय ओं अद्यामुकगोत्र अस्मत्पितरमुकशर्मन्
सपत्नीक वसुस्वरूपाद्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धेपि
एडस्थाने ऽत्रावनेनिक्ष्व ते स्वधा इति छिन्नमूलकुशोपरि
अवनेजनंदद्यात् एवमवनेजनंपितामहादिभ्यः पंचभ्यो

दद्यात् ततः पिण्डान्निर्मायमोटकादीनि प्रथमं पिण्डंचादाय
वामहस्तेन पुष्पकातिस्थजलमादाय ओं अद्यामुकगोत्र अस्म-
त्पितरमुकशर्मन्सपत्नीकएतत्तेस्वरूप अद्यकर्तव्यमहालयापरप
क्षान्तर्गतपार्वण श्राद्धे एष पिंडोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतो
स्ते स्वधा इत्यवनेजनोपरि पिण्डं दद्यात् एवंपितामहादिभ्यः
पंचभ्य अवनेचनोपरिपिण्डं दद्यात् ततः आस्तृतकुशमूलेन
लेपभागभुजस्तृप्यन्तु इतिकरंप्रोक्ष्यसव्यंकृत्वा द्विराचम्यहरिं
स्मरेत् ततः सव्येनैवपुष्पादीन्यादाय पित्रादीनुद्दिश्य ओं अ
त्रपितरोमादयध्वंतथाभागमावृषायध्वम् इति उत्तराभिमुखो
भूत्वा श्वासं नियम्यभास्करमूर्तीन्पित्रादीन्ध्यान् अपसव्यं-
कृत्वादक्षिणावर्त्तेनदक्षिणाभिमुखो भूत्वा ओं अमीमदन्तपित
रोयथाभागमावृषायिषतइतिमंत्रेणपुष्पादिकानिपिण्डेषुक्षिपेत्

ततः प्रत्यवनेजनपात्रं वाममहस्ते कृत्वा मोटकादिकमादाय
ओं अद्यामुकगोत्रास्मन्नपितरमुकशर्मन्सपत्नीकवसुस्वरूप अ-
द्यकर्तव्यमहालयापरपक्षान्तर्गत पार्वणश्राद्धे इदंपिण्डप्रत्यवने
जनं तेस्वधा इति पितृपिण्डेप्रत्यवनेजनंदद्यात् एवंपितामहा
दिषु पंचपिण्डेषु प्रत्यवनेजनं दद्यात् · ततानीवींविसंस्यसव्यं
कृत्वाचम्य हरिंस्मरेत् अपसव्यंकृत्वावामेनपाणिनाधृतंसूत्र द
क्षिणेनादाय ओं नमोवः पितरो रसाय नमोवः पितरःशोषाय
नमोवः पितरोजीवाय नमोवः पितरःस्वधायै नमोवः पितरो
घोराय नमोवः पितरो मन्यवे नमोवः पितरः पितरो नमोवो
गृहान्नः पितरो दत्तसतो वः पितरो देष्मैतद्वः पितरो वास
इति मंत्रेण प्रत्येकं पिंडोपरिसूत्रं दद्यात् ततः क्रमेणप्रत्यैकं
पिण्डान् गंधादिभिः संपूज्य धूपदीपौचकारयेत्मोटकादिकमा-

दाय ओं अद्यामुकगोत्रः अस्मत्पितृपितामहप्रपितामहा अमु
कामुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्य
कर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एता निपिण्डार्चना
नि अत्रसूत्रागन्धपुष्पाक्षतधूपदीपैवादिनैवेद्यानित्रेधाविभज्य
युष्मभ्यं स्वधा इतिपित्रादिभ्यो गंधादिकमुत्सृजेत् पुनरपि
मोटकादिकमादाय ओं अद्यामुगोत्रः अस्मन्मातामहप्रमाता
महवृद्धप्रमातामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरु-
द्रादित्यस्वरूपा अद्यकर्तव्यमहालयापरपक्षान्तर्गतप र्वणश्राद्धे
एतानिपिण्डार्चनानिअत्रासूत्रागंधपुष्पाक्षातधूपदीपैक्षावादिनैवे
द्यानित्रेधा विभज्ययुष्मभ्यं स्वधेति मातामहादिभ्योगन्धादि
कमुत्सृजेत् ततः सव्येन विश्वेदेवब्राह्मणकरयोःओं शिवाआप
संतुइतिजलं ओं सौमनस्यमस्तु इतिपुष्पं ओं अक्षतंचारिष्टम

स्तुइति यवान्प्रत्येकं दद्यात् अपसव्येन पितृब्राह्मणकरयोः ओं ।
शिवाआपः संत्वितिजलं ओं सौमनस्यमस्त्वतिपुष्पं ओं
अक्षतं चारिष्टमस्त्वतितं दुलान्प्रत्येकं दद्यात् सव्येनांजलिं बध्वा
पूर्वाभिमुखो भूत्वेति पठेत् ओं अपांमध्ये स्थितादेवाः सर्वमप्सु
प्रतिष्ठितम् ब्राह्मणस्यकरेन्यस्ताः शिवा आपो भवन्तुमे ॥
लक्ष्मीर्वसति पुष्पे लक्ष्मीर्वसति पुष्करे लक्ष्मीर्वसति गोष्ठेषु
सौमनस्यं ददातुमे ॥ अक्षतं चास्तुमे पुण्यं शांतिः पुष्टिर्धृति-
स्तथा यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदामम ॥ ततः कर्म-
पात्रोदकंकुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिंचेत् अस्मत्कु
लेदीर्घमायुरस्तु ओं शांतिरस्तु ओं पुष्टिरस्तु ओं यच्छ्रेय-
स्तदस्तु ओं यत् पापं तत् प्रतिहतमस्तु इतिभूमौ ओं द्विपदेच
तुष्पदेभ्यः शांतिर्भवतु ततोपसव्येन पिंडशेषान्नं पिण्ड समीपे

विकिरेत् वामहस्ते पुटकादिस्थजलं गृहीत्वा मोटकादिकमादाय ओं अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसु-स्वरूपस्य अद्यकर्तव्यमहालयापरपक्षांतर्गतपार्वणश्राद्धे दत्ते-तदन्नपानादिकमक्षय्यमस्तु इतिपितृपिण्डोपरि अक्षय्योदकं दद्यात् एवं पितामहादिपंचपिण्डेभ्यो दद्यात् ततःसव्येन कृतां-जलिर्दक्षिणां दिशमवलोकयन् ओं अघोराः पितरः सन्तु इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् सव्येनैव प्राङ्मुखो भूत्वा बध्वा आशिषः प्रार्थयेत् ओं गोत्रंनो वर्धताम् ओं वर्धतामिति प्रतिवचनम् ओं दातारो नोभिवर्धन्ताम् ओं वर्धन्तामितिप्रति-वचनम् वेदाः सन्ततिरेवच ओं सन्त्विति प्रतिवचनम् ओं श्रद्धा च नो मागात् ओं मागादिति प्रतिवचनम् ओं बहुदेयञ्चनोस्तु ओं अस्त्विति प्रतिवचनम् ओं अन्नं चनो

बहुभवेत् ओं भवत्विति प्रतिवचनम् ओं अतिथिंश्चलभेमहि ओं लभध्वमिति प्रतिवचनम् ओं याचितारश्च नः सन्तु ओं सन्त्विति प्रतिवचनम् मा याचिष्म कंचन ओं मा याचेथाः इतिप्रतिवचनं ओं एता आशिषः सत्यःसन्तु सन्त्विति प्रतिय वचनम् ॥ ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात् ओं यं कामं कामयते सोस्मै कामः समृध्यतामितिमन्त्रेण ततः अपसव्येन सपवित्रान्कुशान्न्युब्जपात्रोपरि स्थितान् पि एडोपरि निक्षिप्य ओं स्वधां वाचयिष्ये ओं वाच्यतामिति प्रतिवचनांतरं रिक्ताञ्जलिना ओं अद्यामुकगोत्रेभ्योऽस्म- त्पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नी- केभ्यो वसुरुद्रादित्यस्वरूपेभ्यस्तथामुकगोत्रेभ्योस्मन्मातामह प्रमातामहवृद्धप्रमातामहेभ्योमुकामुकामुकशर्मभ्यः सपत्नी-

केभ्यो वसुरुद्रादित्यस्वरूपेभ्यः अद्यकर्तव्यमहालयापरप
क्षातर्गतपार्वणश्राद्धे स्वधोच्यतां अस्तु स्वधा इति प्रति-
वचनम ततः पयसादिसहितं पुटकं वामहस्ते कृत्वा ओं
ऊर्ज्जंवहन्तीति मन्त्रेण सपवित्रकुशोपरिदक्षिणाग्रां पयो-
धारां दद्यात् ततः ओं पिण्डाः संपन्ना इतिब्राह्मणं पृच्छेत्
ओं सुसंपन्नाः इति प्रतिवचनम् ओं पिण्डानुत्थापयामि ओं
उत्थापयस्वेत्यनुज्ञातः सन्नम्रीभूयपिंडानाघ्रायोत्थापयेत् पिंडा
धारकुशानुलमुकांश्च वन्हौ क्षिपेत् सव्येन पिंडाकायां शंखं
चक्रं च लिखेत् ओं शंखाय नमः ओं चक्राय नमः इतियवैः
शंखचक्रपूजाविधाय अपसव्यं कृत्वा ओं गयायांपितृरूपेण
स्वयमेवजनार्दनतं दृष्टवा पुण्डरीकाक्षं मुच्यते च ऋणत्रया
त् । इतिमन्त्रेण पिंडान् पिंडिकोपरि निधाय पूजयेदेभिर्म,

न्त्रैः सव्ये ओं वसंताय नमस्तुभ्यं ग्रीष्माय च नमोनमः
वर्षाभ्यश्च शरत्संज्ञऋतवेचनमोनमः हेमन्तायनमस्तुभ्येनमस्ते
शिशिरात्मय मासंसंवत्सरेभ्यश्चदिवसेभ्यो नमोनमः ततः
सव्येनैव विश्वेदेवार्घपात्रं संचाल्य अपसव्येनपित्रर्घपात्रा-
ण्युत्तानीकृत्य सव्येन दक्षिणां दद्यात् कुशयवजलदक्षिणा
द्रव्याण्यादाय ओं अद्यामुकगोत्राणामस्मत्पितृ पितामहप्रपि-
तामहानामुकामुकामुकशर्मणां सपत्नीकानां वसुरुदादित्य-
स्वरूपाणांपुरूरवोमाद्रवोनाम्नामद्यकृतैतन्महालयापरपक्षान्त
र्गतपार्वणश्राद्धे श्राद्धसंबन्धिवैश्वदेविकश्राद्धप्रतिष्ठासिद्ध्यर्थं
दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितद्रव्यममुक-
गोत्राय अमुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे
इति ब्राह्मणकरे उत्सृजेत् पुनर्दक्षिणासहितकुशादिकमा-

दाय ओं अद्यामुकगोत्राणास्मन्मातामहप्रमातामह वृद्धप्र-
मातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादि-
त्यस्यवरूपाणां पुरूरवामाद्रवोनाम्नामद्य कृतैतत् महा-
लयापरपक्षान्तर्गतपार्वणश्राद्धसंबंधिवैश्वदेविकश्राद्धप्रतिष्ठासि
ध्यर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्य-
ममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहंसंप्रददे इति
ब्राह्मणकरेउत्सृजेत् ॥ कुशतिलजलदक्षिणाद्रव्याण्यादाय
ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुका-
मुकामुकशर्म्मणां सपत्नीकानां वसुरुद्रादित्यस्वरुपाणां कृतैत-
न्महालयातद्दान्तर्गत पार्वण श्राद्धप्रतिष्ठासिद्धयर्थदक्षिणां
रजतंचन्द्रदैवतं तन्मूल्योपकल्पित द्रव्यममुकगोत्रायामुकशर्मणे
ब्राह्मणायाय तुभ्यमहंसंप्रददे पुनः कुशतिलल जलदक्षिणाद्रव्य-

एयादाय ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्ध
प्रमातामहानामुकामुकामुकशर्मणांसपत्नीकानां वसुरुद्रादि
त्यस्वरूपाणां कृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धप्रतिष्ठा
सिद्धयर्थं दक्षिणां रजतं चन्ददैवतं तन्मूल्योपकल्पितं द्रव्यमसु
कगोत्रायायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इतिब्राह्मण
करे उत्सृजेत् पुनः कुशतिलजलदक्षिणा द्रव्याण्ययादाय ॐ
अद्यामुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानामुका
मुकामुकशर्मणां सपत्नीकानां वसुरूद्रोदित्यस्वपाणां तथा
अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां
अमुकामुकामुकशर्मणां सपत्नीकानां वसुरूद्रादित्यस्वरूपाणां
अद्यकर्तव्यमहालयापरपक्षान्तर्गत पार्वणश्राद्धेन्यूनातिरिक्तप
रिपूर्णार्थंयद्दे यं अन्नादिकंयथानामदैवतंनानानामगोत्रेभ्यो

ब्राह्मणेभ्यो यथाभागं विभज्यदातुममुत्सृजे । अपसव्येन ॐ
व्वाजेवाजेवतव्वाजिनोनोजनेषुध्विप्रा अमृता ऋतज्ञा ॥ अस्य
मध्वः पिबत मादयध्वं तृप्तायात पथिखिर्देवयानैः इतिमन्त्रेण
पित्रादीन्विसर्जयेत् ततः सव्यंकृत्वाओंपुरुरवोमाद्रवोनामानो
विश्वेदेवाःप्रीयंतामितिविश्वेदेवविसर्जनम् ॥ ततःओं देवताभ्यः
पितृभ्यश्च महायोगिभ्य एव च ॥ नमःस्वाहायै स्वधायै नित्य
मेव नमोनमः इतित्रिः पठेत् अपसव्येनदीपाच्छादनं विधाय
सव्येन हस्तौ पादौ प्रक्षाल्याचम्य इति पठेत् ॥ ओं यत्कृवं तत्
सुकृतमस्तु यन्नकृतं तद्विष्णोः प्रसादात् ब्राह्मणवचनात्सर्व
परिपूर्णमस्तु ॥ १ ॥ प्रमादात्कुर्वतां कर्मप्रच्यवेताध्वरेषु च ॥
स्मरणादेव तद्विष्णोः सम्पूर्णस्यादितिश्रुतिः ॥ २ ॥ आयुः
प्रजां धनंविद्यां स्वर्गमोक्षसुखानि च ॥ प्रयच्छन्तु तथा

राज्यं पितरः श्राद्धतर्पिताः ॥ ३ ॥ कायेन वाचा० ॥ यस्य-स्मृत्या० चतुर्भिश्च० इति मन्त्रेण विसर्जनम् ॥ इत्यपरपक्ष श्राद्धविधिः समाप्तः ॥

हरिः ओं शतमिन्नुशरदो अन्तिदेवायत्रानश्चकाजरस-न्नूनाम् ॥ पुत्रासोयत्र पितरोभवन्तिमानोमद्धयारीरिषतायु-र्गन्तोः ॥ १ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपि-ता सपुत्रः विश्वेदेवा अदितिः पञ्चजना अदितिर्ज्जातमदि-तिर्जनित्वम् ॥ २ ॥ स्वादुषर्ठ० सदाः पितरोवयोधाः कृच्छ्रे श्रिः शक्तीवन्तोगभीराः चित्रसेना इषुबला अमृद्धा सतो-वीरा उरवोव्रातसाहाः ॥ ६ ॥ ब्राह्मणासः पितरः सोम्यासः शिवेनोद्यावापृथिवी अनेहसा ॥ पूषानः पातुदुरिता दृताद्धो-धोरक्षामाकोनोअघशर्ठ० सईशत ॥ पितृभ्यः स्वधायिभ्यः

६

स्वधानमः पिता महेभ्यः स्वधायिथः स्वाधनमः प्रपितामहे
भ्यः स्वधायिभ्यः स्वधानमः ॥ अक्षन्नपितरोमीमदन्त पितरो
तीतृपन्तपितरः पितरः शुन्धध्वम् ॥ ५ ॥ पुनन्तुमापितरः
सोम्म्यासः पुनन्तुमा पितामहाः पुनन्तुप्प्रपितामहाः पवित्रेण
शतायुषा पुनन्तुमा पितामहाः पुनन्तुप्प्रपितामहाः पवित्रेण
शतायषाव्विश्वमायुर्विष्णवैं ॥ ६ ॥ ॥ समाप्तम् ॥

॥ अथ तीर्थश्राद्धप्रारम्भः ॥

अत्रस्मृतिः ॥ आसनं पिण्डदानं च पुनः प्रत्यवनेजनम् ।
दक्षिणा चान्नसंकल्पं सर्वतीर्थेष्वयं विधिः ॥ १ ॥ अपवित्रः
पवित्रोवासर्वावस्थांगतोपिवा । यःस्मरेत्पुंडरीकाक्षं सबाह्या-

भ्यंतरः शुचिः ॥ २ ॥ श्रीविष्णुः पुंडरीकाक्षः पुनातुइत्यनेन
श्राद्धीयवस्तूनि सिंचेत् आत्मानमपि सिंचेत् जलत्रिकुशैः ॥
ततः प्रार्थना करसंपुटीकृत्वा विष्णु मनसाध्यात्वा प्रार्थयेत्
पूर्वमुखः ओं नमोनमस्तेगोविंदपुराण पुरुषोत्तम । इदं श्राद्धं
हृषीकेश रक्षता सर्वतोदिशि ॥ ३ ॥ ततः तीर्थश्राद्धनिमित्तं
संकल्पं कुर्यात् तद्यथा ओं तत्सदद्यामुकमासेऽमुकपक्षे मुकति-
थावमुकवासरेऽमुकतीर्थे ममआत्मनः समस्तपितृणां समुद्धा
रार्थं पितृणां मातृगुरुस्वसृणामक्षयतृप्तिहेतवे समस्ततीर्थ-
जन्यफलप्राप्त्यर्थपितणां अक्षयतृप्त्यर्थं अमुकतीर्थेतीर्थश्राद्धं
पिंडदानं चाहं करिष्ये ॥ ४ ॥ वेदीं निर्मायोत्तरत उच्चां दक्षि-
णनम्रां पंचगव्येन सिंचेत् दक्षिणाभिमुखः पितरोपनीतिमप-
सव्यं पातितवामजानुः तिलगौरसर्षपपुष्पचंदनानि विकिरेत्

॥ ५ ॥वेदीं ततः द्विगुणमुग्नत्रिकुशरूपमासनानि द्वादशप्रत्येकं स्थापयेत् अनेन मंत्रेण अयोध्यामथुरामायाकाशीकांचो अवंतिका । पुरी द्वारावती चैव सप्तैता मोक्षदायकाः ॥ ॐ कव्यवाडनलः सोमो यमश्चैवार्यमातथा । अग्निष्वात्ताबर्हिषदः सोमपाः पितरस्तथा इति ॥ ६ ॥ ततः आसनोपरि तिलजलपुष्पगंधंपात्रे कृत्वा अद्यामुकगोत्राणां ममपितृपितामहप्रपितामहवृद्धप्रपितामहानांसपत्नोकानामासनोपरिअवनेजनं अहं संप्रददे ॥ ७ ॥ एवं मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां आसनोपरि अवनेजनमहं संप्रददे इत्यनेनासनोपरि पात्रस्थं जलमर्द्धं ददेत अर्द्धं जलं अवशेषयेत्ॐ अद्यामुकगोत्रास्मत्पिता अमुकनामातस्य अक्षयतृप्त्यर्थइदंहविष्यान्नमयं अमृतरूपंमधुतिलजलादिप्रोक्षितं पिण्डंतस्मैस्वधा

॥ ९ ॥ अद्यामुकगोत्रास्मत्पिता अमुकनामातस्याक्षयतृप्त्यर्थं
इदं हविष्यान्नमयं पिण्डं अमृतरूपं मधुतिलजलप्रोक्षितं तस्मै
स्वधा ॥ १० ॥ अद्यामुकगोत्रास्मत्प्रपिताहामुकनामा तस्य
अक्षयतृप्त्यर्थंइदं हविष्यान्नमयं अमृतरूपंतिलमधुजल प्रोक्षितं
पिण्डं तस्मै स्वधा ॥ ११ ॥ अद्यामुकगोत्रास्मद्वृद्धप्रपिता
महाऽमुकनाम्ना इदं हविष्यान्नमयं अमृतरूपं मधुतिलजप्रो-
क्षितं पिंडं तस्मै स्वधा ॥ १२ ॥ अद्यामुकगोत्रायाः मम मातुः
अमुकदेव्याः तस्याअक्षयतृप्त्यर्थ इदं हविष्यान्न मयं अमृत-
रूपं मधुतिलजप्रोक्षितं पिंडं तस्यै स्वधा ॥ १३ ॥ अद्यामु-
कगोत्रायाः ममपितामहीअमुकीनाम्नी देवी तस्याः अक्षयतृ-
प्त्यर्थं इदं हविष्यान्नामयं अमृतरूपं मधुतिलजलप्रोक्षितं पिंडं
तस्यै स्वधा ॥ १४ ॥ अद्यामुकगोत्रायाः ममप्रपितामही

अमुकनाम्नी देवी तस्या अक्षयतृप्त्यर्थं इदं हविष्यान्नयं अमृतरूपं मधुतिलजलप्रोक्षितं पिंडं तस्यै स्वधा ॥ १५ ॥ अद्यामुकगोत्रा अस्मद्वृद्धप्रपितामही अमुकनाम्नी तस्या अक्षयतृप्त्यर्थं इदं हविष्यान्नमयं अमृतरूपं मधुतिलजलादिप्रोक्षितं पिंडं तस्यै स्वधा ॥ १६ ॥ अद्यामुकगोत्रः द्वितीयगोत्रः अस्मन्मातामहामुकनाम्नः तस्य अक्षयतृप्त्यर्थं इदं हविष्यान्नम यं अमृतरूपं मधुतिलजलादिप्रोक्षितं पिंडं तस्मै स्वधा अद्यामुकोत्र द्वितीयगोत्र अस्मत्प्रमातामहामुकनाम्नस्तस्य अक्षयतृप्त्यर्थं इदं हविष्यान्नमयं अमृतरूपं मधुतिलजलादिप्रोक्षितं पिंडं ते स्वधा अद्यामुकगोत्रः द्वितीयगोत्र अस्मद्वृद्धप्रमातामहामुकनाम्नः तस्यअक्षयतृप्त्यर्थं इदं हविष्यान्नमयं अमृतरूपं मधुतिललजप्रोक्षितं पिंडं ते स्वधा ॥१७॥ अद्या

मुकगोत्राद्वितीयगोत्रा अस्मन्मातामही चामुकनाम्नी देवी तस्या अक्षयतृप्त्यर्थं इदं हविष्यान्नमयं अमृतरूपं मधुतिलजलादिप्रोक्षितं पिंडं तस्यै स्वधा अद्यामुकगोत्रा द्वितीयगोत्रा अस्मत्प्रमातामही अमुकनाम्नीदेवी तस्याः अक्षयतृप्त्यर्थ इदं हविष्यान्नमयं मधुतिजलादिप्रोक्षितं पिंडं तस्यै स्वधा । अस्मद्वृद्धप्रमातामही अमुकनाम्नी तस्या अक्षयतृप्त्यर्थ इदं हविष्यान्नमयं मधुतिजलादिप्रोक्षितं पिंडं तस्यै स्वधा ॥ १८ ॥ एवं पितृव्यं पितृव्यपत्नीं पितृस्वस्रीयं पितृस्वसृमातुलं मातुलानीम्, मातृस्वसृमातृस्वस्रीयम् भ्रातुः भ्रातृपत्नीनांनामगोत्रमुच्चारणंकृत्वापिंडददद्यात् ॥ १९ ॥ आब्रह्मणोयेपितृवंशजाता मातुस्तथा वंशभवामदीयाः । वंशद्वये ये मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च मित्राणि शिष्याः प

शवश्चवृक्षादृष्टाश्च स्पृष्टाश्च कृतोपकाराः । जन्मांतरे ये मम संगताश्चतेषां स्वधापिंडमहं ददामि १ ये केचित्प्रेतरूपेण वर्तन्ते पितरोमम । तेसर्वे तृप्तिमायांतु पिंडदानेन शाश्वतीम् २ ये बान्धवाऽबान्धवायेयेऽन्यजन्मनि बांधवाः । तेषां पिंडो मया दत्त अक्षय्यमुपतिष्ठतु ३ पितृवंशेस्मृता ये च मातृवंशे तथैव च । गुरुश्वशुरबंधूनां ये चान्ये बांधवाः स्मृताः ४ येमे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः । तेषां पिंडोमयादत्तअक्षय्यमुपतिष्ठतु ५ ॥ २० ॥ ॐ अद्यामुकगोत्राणां मम पितृपितामहप्रपितामहवृद्धप्रपितामहानां तथा मातापितामही प्रपितामही वृद्धप्रपितामहीनां पिण्डोपरिप्रत्यवनेजनं संप्रददे, इति एवं मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानांपिण्डोपरिप्रत्यवनेजनं संप्रददे इत्यनेनपिण्डोपरि

अर्घशेषं जलं दद्यात् ॥ २१ ॥ ततः पिंडपूजनं गंधपुष्पधूप
दीपनैवेद्यतांबूलपूगीफलएलालवंगयज्ञोपवीतवस्त्र तुलसीदला
दिकं दत्वाजलेन नामगोत्रोच्चारणंकृत्वा तर्पणंकुर्यात् ॥२२॥
सर्वेषां पिंडोपरि तर्पणं विधेयम् येषां पिंडदानं कृतम् । ततः
सव्यं कृत्वाचमनम् ॥ २३ ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्व
रेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः १
विष्णुस्मरणं करसंपुटीकृत्वा ॥ २४ ॥ सूर्याय अर्घ्यम् । एहि
सूर्य्यसहस्रांशो तेजोराशे जगत्पते । अनुकंपय मां भक्त्या
गृहाणार्घ्यं नमोस्तु ते १ ॥२५॥ अर्घ्यं दत्वानमस्कारंचकृत्वा
यथाशक्त्याब्राह्मणपूजनं भोजनं दक्षिणादानं कुर्यात् ओंअद्य
कृत्तैतत्तीर्थश्राद्धसांगतासिद्ध्यर्थं अमुकतीर्थमम समस्तपितृणां
अक्षयतृप्त्यर्थं आत्माः सहसर्वेषामुद्धारणार्थं न्यूनातिरिक्तदो

परिहारार्थं इन्दं रजतं चन्द्रदैवतंयथानामगोत्राय ब्राह्मणाय दक्षिणाकर्तव्यताक च तुभ्यमहं संप्रददे स्वस्तीति प्रतिवचनम् ॥ २६ ॥ नमोवः ततोऽभिगम्यतामिति विसर्जनम् । पिंडानाघ्रायोत्थाप्य ब्राह्मणाय जले गवे वा दद्यात् शेषं जलेनिक्षिपेत्कुशादि ॥ २७ ॥ सुरभिर्वैष्णवीमातानित्यंविष्णुपदे स्थिता ! गोग्रासं च मया दत्तंत्वं गृहाणानुकंपया १ इति गोग्रासं । द्वौ श्वानौ श्यामशबलौ वैवस्वतकुले द्गवौ ताभ्यामन्नं प्रयच्छामि स्यातामेतावहिंसकौ २ इति श्वानबलिः काकोसि यमदूतोसि वाथसोसि महाबल । तुभ्यं बलिंप्रदास्यामिगृहाण यमकिंकर ३ इति काकबलिः ॥ २८ ॥ यत्फलं कपिलादने कार्तिक्यां ज्येष्ठपुष्करे । तत्फलं पांडवश्रेष्ठ विप्राणां पादशौचनात् ४ इत्यनेन दक्षिणपादप्रक्षालनम् । विप्रपादोदक ५४

पीत्वा यावत्तिष्ठतिमोदिनो। तावत्पुष्करतीर्थेपिपीबन्ति पितरो जलम् ॥ ५ ॥ इत्यनेन वामपादप्रक्षालनम् ॥ २६ ॥ चंदनं वंदते नित्यंपवित्रं पापनाशनं। आपदा हरते नित्यं लक्ष्मी र्वसतुसर्वदा ६ इत्यनेनतिलककरणम्। हेमाद्रौ अर्घमावाहर्न चैव द्विजांगुष्ठनिवेशनम्। तृप्तिप्रश्नं च विकिरंतीर्थश्राद्धेविव र्जयेत् ७ नाग्नौ करणांन नेतारंन च बलिवैश्वदेवता पाद्मे तीर्थश्राद्धंप्रकुर्वीत पक्वान्नेन विशेषतः। आमान्नेन हिरण्येन कंदमूलैः फलै रपि ॥ ८ ॥

॥ इति तीर्थश्राद्धविधिः समाप्तः ॥

ए० ४६

असली पुरानो खाल को सुखसागर तयार

आ.

दाम कपड़ाको जिल्द ७) र छालैछाल को ८)

सूचना—नेपाली पुस्तक बेचने बेपारी लाई छाप्ना कारखाना बाट एक पन्ट पुस्तक मंगाई अरु कारखाना भंदा ज्यादा कमीशन लीनु हवस्।



पुस्तक पाइने ठेगाना—

सर्वहितैषी कम्पनी
रामघाट बनारस सिटी।

बा० शिवप्रसाद राघोराम,
गोर्खा पुस्तकालय,
रामघाट, काशी।

४६

* नेपाल श्लोक बद्ध भावका किताब *

रामायण ८ कांड रामाश्वमेद सहित रंगी चगी अनेक कीसीम का तस्वीर मृग छाला को जील्दा छालै छाला सुनका वेल वुटादार–१ के ७॥)

रामायण ८ कांड रामाश्वमेध सहित रंगीन तस्वीरदार छालै छाला को जील्द–१ के ५)

रामायण ८ कांड भानुभक्ताचार्य व रामाश्वमेधश्वलोक छालै छाला को पक्का जिल्द चांदा को वूटा भयेका को ढकनीदार ४)

रामायण ८ कांड रामाश्वमेध स्मेत कपड़ा को जील्दारसुन सनको वेल वृद्दार १-के ४)

ऐ कपड़ा जिल्द ३)

रामायण ८ कांड गुटका कपड़ा २)

तथा छालै छाला २॥)

अमरकोष नेपाली भाषार्थका

अमरकोष भा० टी० नेपाली पं० कूलचंद शर्मा बनाया को ४)

श्रीमद्भागवत श्रीकृष्ण चरीत्र अनेक कीसीम का रंगीन तस्वीर दार मृगछाला को पक्का जील्द छालै छाला को सुनको वूटादार अत्यन्त राम्रो बलियो १ के ७॥)

कृष्ण चरित्रको भागवत १८९० श्लोक १०८ लीला तस्वीर दार छालै छाला को पक्का जिल्द चांदीको वेल वूटेदार ४)

कपड़ा को जिल्द फो	३)
एकादशस्कन्ध ठुलो १ के	१॥)
श्रीमद्भागवत १२ स्कन्ध सब भन्दा ठुलो २४ औतार छालै छाला चाँदी को वेल बूटेदार १ के	६)
ऐ, कपड़ा जिल्द १ के	५)
बिराट पर्व छालै छाला को जिल्द सुन्को वेलदार	३॥)
कपड़ा की जिल्द	२॥)
आदिपर्व महाभारत	२)
ऐ छालै छाला १ के	३)
गदापर्व	१)
मौशल पर्व	॥)
स्त्री पर्व	॥)
सौप्तिक पर्व	॥)
सभापर्व महाभारत	१)
ऐ छालै छाला १ के	२)
द्रोण पर्व महाभारत घमासान	
लड़ाई छ	२॥)
ऐ, छालै छाला के	३॥)
उद्योगपर्व महाभारत	२॥)
ऐ छालै छाला १ का	३॥)
कर्णपर्व महाभारत श्लोक	१॥)
ऐ, छालै छाला १ के	२)
वनपर्व महाभारत	४)
ऐ, छालै छाला १ के	५)
भीष्मपर्व महाभारत	३)
ऐ, छालै छाला १ के	४)
महाभारत १८ पर्व १ के	५)
छालैं छाला	६)
पुरानो कृष्णचरित्र, कोही ऐक मथुरापुरी नगरिमा श्रीकृष्ण औतार भया, भन्ने ठुलो अक्षर को १ के	
ऐ, छालै छाला १ के	४)
सीखर नाथ भाष्य	२॥)
रामायण ७ काण्ड धनुषयज्ञ परशुराम	